M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
No. Ser. 199

Title: Navagraha Malika Prayoga

Patra

177

Navagraha makha Prayoga	: Title
from Narayana Bhatta's	: Author
Prayoga Ratna	: Editor
Sana 1526	: Year, Vols.
	: Publisher
155	: Remarks

ग्रह· प्रयो·

१

श्रीगणेशाय नमः· अथ परिशिष्टोक्तरीत्या ग्रहमखप्रयोगः॥ स च नित्यनैमित्तिक
काम्यभेदेन त्रिधा· अयनविषुवोपरागादिषु नित्यः गर्भाधानादिकर्मांगभेषु नैमित्तिकः
विपदपगमसंपदादिकामनायां काम्यः· अत्र मूलान्याकरतो ज्ञेयानि· ग्रहरूपादि ज्ञात्वा
कर्म कार्यं अन्यथा विफलं· तदाहाश्वलायनाचार्यः रूपवर्णायुधस्थानमंडलासनवाह
नान्· समित्कुंडोपहारांश्च पुष्परत्नाकृतीरपि· गायत्रीमूलमंत्रांश्च नाममंत्रांश्च कव
लान्· अधिप्रत्यधिदेवानां मंत्रांश्चार्थादिसंयुतान्· तत्तत्सूक्तांश्च जानीयाद्योथसर्वा
न्नवग्रहान्· अज्ञात्वैवं पुमान्निष्टा तत्फलं नैव विंदति· इदं सर्वं शास्त्रोक्तमिति महद्यत्नादि
द्धाध्य विंद्युमान्· इति गायत्री ग्रहगायत्री प्रयोगे वक्ष्यते· वर्णादयश्च मंडपकुंडादि च

शिव
१

काम्ये यथोक्तं कार्यं· नित्यनैमित्तिके हित्वा सर्वमन्यत्समंडपं इति मात्स्योक्तेः· कुंडं वास्थं
डिलं पिवाभावार्योक्तेश्च· मंडपलक्षणं हेमाद्रौ मात्स्यपुराणे· गृहस्योत्तरपूर्वेण मंडपं का
र्यं शुभः· रुद्रायतनसंमात्रा चतुरस्रमुदक्प्लवं· दशहस्तान् तथाष्टौ वा हस्तान्कुर्याद्विधानतः·
तस्य द्वाराणि चत्वारि कर्तव्यानि विचक्षणैः· कुंडं तु स्कंदपुराणे· नवग्रहमखे कुंडं हस्तमात्रं
समंततः चतुरस्रसमं प्राहुर्हस्तं योनिवक्त्रं समं खलं· चतुरंगुलविस्तारा मेखला तद्वदुच्छ्रिताः·
मात्स्ये· वितस्तिमात्रा योनिः स्यात्षट्सप्तांगुलविस्तृता· कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चां
गुलोच्छ्रिता· गजोष्ठसदृशी तद्वदायता छिद्रसंयुता· मेखलोपरि सर्वत्र अश्वत्थदल
संनिभा· गजोष्ठतुल्या अश्वत्थदलतुल्या वेति विकल्पः सा च योनिः पश्चिमतः कार्या· प

ग्रह· प्र·

श्चिमे भूमध्यभागे तु योनिं कुर्याद्विधानतः इति गर्गोक्तेः· मात्स्ये· मानहीनाधिकं कुंडमनेकभ
यदं भवेत्· तस्य वोत्तरपूर्वे तु स्थंडिलं हस्तमात्रकं· त्रिवप्रं चतुरस्रं च वितस्त्युच्छ्रायसं
मितं· स्थंडिलं वेदिः वप्रामिखलाः द्व्यंगुलोच्छ्रितो वप्रः प्रथमः समुदाहृतः अंगुलोच्छ्रा
२ यसंयुक्तं वप्रद्वयमथोपरि· द्व्यंगुलस्तत्र विस्तारः सर्वेषां कथितो बुधैरिति अन्यत्सर्वं
वर्णदेशानामादिप्रयोगस्पष्टीभविष्यति· ॥ अथ ग्रहयज्ञप्रयोगः ॥ यजमानः स्ना
त्वा नित्यकर्म निर्वर्त्य मौहूर्तिकोक्ते शुभकाले संकीर्त्य अयनादि नित्यकालेषु संक
ल्पयेत्· ग्रहानुकूल्यसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्ये इति·˟ विप
दपगमादिकामनायां तु अमुककामनासिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं २
गर्भाधानादिनिमित्तेषु अमुककर्मकर्तुमादौ आदित्यादिग्रहानुकूल्यसिद्धिद्वारा परमेश्वरप्री
त्यर्थं ग्रहयज्ञं करिष्य इति· २

तदंगत्वेन पुण्याहवाचनादिं कृत्वाचार्यादीन् वृणुयात्·

करिष्य इति· ततः संभारानासादयेत्· तत्र नित्यनैमित्तिकयोः प्रतिपदोक्तवस्तूनि तदभावे तु
कूल्यरूपाणि वा यथाशक्ति संपादयेत्· काम्ये तु प्रतिनिध्यभावात्प्रतिपदोक्तवस्तून्येव·
तत्र आचार्यादिवरणं तत्र विधिज्ञं स्वशाखाविदं साचारमेकं अस्मिन् ग्रहमखे त्वमा
चार्यकं कुर्विति पाणिना पाणिमुपस्पृश्य वृणुयात्· अन्यानार्त्विक्यं कुर्विति प्रत्येकं ज्यं
वृणुयात्· तत्र अमुकप्रवरान्विता अमुकगोत्रोत्पन्नं अमुकवेदांतर्गत अमुकशाखाध्या
यिनं अमुकशर्माणं ब्राह्मणं अस्मिन् ग्रहमखकर्मणि आचार्यत्वामहं वृण इति वृतोस्मी
त्युक्त्वा· आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः तथा त्वं मम यज्ञेस्मिन्नाचार्यो
भव सुव्रत· इत्याचार्यस्य· नवहोमानुसारेण चत्वारोष्टौ षोडश वा ऋत्विजः करिष्यामीत्यु
क्त्वा नामभिः· अस्य यागस्य निष्पत्त्यै भवंतोभ्यर्थिता मया· सुप्रसन्नैः प्रकर्तव्यं

शांतिकं विधिपूर्वकं इति ऋत्विजां ततो गंधवस्त्रादिभिः यथाशक्ति तेषां पूजनं॰ तत्र आ
चार्यो ग्रहप्रतिमानामग्न्युत्तारणं कुर्यात्तत्र विधिः परिशिष्टे॰ ताम्रं स्फटिकं रक्तचंदनं सु
वर्णं तद्वद्रजतं लोहं सीसं कांस्यमिति नवप्रतिमाद्रव्याणि स्ववर्णमेकमेव वा सर्वेषामि
ति॰ तद्वेति बृहस्पतेरपि बुधवत्सौवर्णः प्रतिमेत्याशयः ततः आचार्यः पवित्रपाणिः
देशकालौ संकीर्त्य यजमानानुज्ञया चार्यकर्म करिष्य इति संकल्प्य॰ यदत्र संस्थितं
भूतं स्थानमाश्रित्य सर्वदा॰ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॰ अपक्रामंतु॰ इति
प्राच्यादि दिक्षु प्रादक्षिण्येन सर्षपान् विकीर्य॰ शुचीं वो हव्या मरुतः शुचीनां शुचिं हि
नोम्यध्वरं शुचिभ्यः। ऋतेन सत्यमृतसाप आयञ्छुचिजन्मानः शुचयः पावकाः। अ
ग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः। शुचीरोचत आहुतः। उदग्ने शुचयः स्त

देवा आयांतु यातुधाना अप यांतु विष्णो देवयजनं रक्षस्वेति भूमौ प्रादेशं कुर्यात्

वः शुक्रा भ्राजंत ईरते। तव ज्योतींष्यर्चयः। इति तद्वेन पंचगव्येन तथैव प्रोक्ष्य॰ ॐ आपो हि
ष्ठेति तद्वेन शुद्धोदकेन तथैव प्रोक्ष्य कृतांजलिः स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भूतं वा
यसं देवतानां॰ असुरघ्नमिंद्रसखं समत्सु बृहद्यशो नावमिवारुहेम। अंहोमुचं मां
गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यं। प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संबाधेष्व
भयं नो अस्तु। इति मंत्रद्वयेन देवतां संप्रार्थ्य॰ तत्र नवग्रहप्रतिमानां आग्न्युत्तारणं कु नां
र्यात॰ अग्निः सप्तिं वाजंभरमिति मंत्रस्य सूक्तस्य॰ गृणत्कृषिः अग्निर्देवता॰ त्रिष्टुप्
छंदः॰ अग्न्युत्तारणे विनियोगः॰ अग्निपदरहितेनाग्निः सप्तिमिति सूक्तेनाभिषिच्य॰
पुनरग्निपदात् सूक्तेन तेन वाभिषिंचेत्॰ इति अग्न्युत्तारणं॰ ततः आचार्यः कर्मसंकल्प
पूर्वकं गृहाद्उत्तरत ईशानतो वा कृतायां चतुर्दिक्षु हस्तमात्रावरायां चतुरस्त्रि द्व्यंगुलप्र

ग्रहम· प्र·

४

माणत्रिहस्तमिकायां ग्रहदेवयां शुक्लव्रीहितंडुलैः सकर्णिकमष्टदलमंबुजमुल्लिख्य कर्णि
कायां दलेषु च वर्तुलादिग्रहपीठानि तत्तद्वर्णाक्षतैर्यथोपपन्नैर्वा कुर्यात्· तानीत्थं·
मध्ये रक्ताक्षतैर्वर्तुलमादित्याय· आग्नेय्यां शुभ्राक्षतैश्चतुरस्रं सोमाय· दक्षिणे रक्ता
क्षतैस्त्रिकोणमंगारकाय· ईशान्ये हरिताक्षतैर्बाणाकारं बुधाय· उत्तरे हरिताक्ष
तैर्दीर्घचतुरस्रं गुरवे· पूर्वे शुभ्राक्षतैः पंचकोणं शुक्राय· पश्चिमे कृष्णाक्षतैः श्वा
पाकारं शनये· नैर्ऋत्ये कृष्णाक्षतैः शूर्पाकारं राहवे· वायव्ये चित्राक्षतैर्ध्वजाकारं केतवे·
उदीच्यां रंगवल्लिकारंजितपद्मोपरि घृतधान्यपीठे नवमव्रणमकालकं तैजसं मृन्मयं
वा लिप्तमलंकृतं शुभमभिषेककुंभं निधाय· इमं मे गंगे इति सिंधुक्षित्प्रैयमेधो नद्यो
जगती· अनेन पुण्यजलेन पूरयित्वा· नवसूत्रेण वस्त्रयुग्मेन चावेष्ट्य· हयगजवल्मी ४

मह्यौ॰ ओषध॰ आकलशेष्वित्यस्य काश्यपोऽसितः पवमानः सोमो गायत्री· कलशस्थापने वि॰

त्वक्प्रक्षेपणे वि॰

कगोष्ठराजद्वारह्रदचतुष्पथमृदः उद्धृतासि वराहेण कृष्णेन शतबाहुना· मृत्तिके हर मे
पापं यन्मया दुष्कृतं कृतं इति कुंभे निक्षिप्य· रुवंति भीम इत्यस्य वैश्वामित्रो रेणुः पव
मानः सोमो जगती· ॐ रुवंति भीमो वृषभस्तविष्यया शृंगे शिशानो हरिणी विचक्षणः
आ योनिं सोमः सुकृतं निषीदति गव्ययी त्वग्भवति निर्णिगव्ययी· अनेन न्यग्रोधा
श्वत्थप्लक्षजंबूचूतवृक्षत्वचः· प्रवो यज्ञेष्वित्यस्य वसिष्ठो विश्वेदेवास्त्रिष्टुप्· ॐ प्रवो पल्लवप्रक्षेपणे वि॰
यज्ञेषु देवयंतो अर्चन्द्यावा नमोभिः पृथिवी इषध्यै· येषां ब्रह्माण्यसमानि वि[…]प्रा
विष्वग्वियंति वनिनो न शाखाः· अनेन तेषां पल्लवान्निक्षिप्य· आप्यायस्वेति राहू
[illegible] गणो गौतमः सोमो गायत्री ॐ आप्यायस्व समेतु ते विश्वतः सोम वृ[…]ष्ण्यं भवा
वाजस्य संगथे अनेन गोक्षीरं· दधिक्राव्ण इत्यस्य गौतमो वामदेवो दधिक्रावा अ

दधि प्रक्षेपणे ॥

नवग्र• प्र•

सोमपप्रक्षेप•

५

ष्टुप्• ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत्प्रण
आयूंषि तारिषत्। अनेन दधि• शुक्रमसि ज्योतिरसि तेजोसि इत्याज्यं• गंधद्वारेत्य
स्यानंदः श्रीरनुष्टुप्• ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं। ईश्वरीं सर्वभू
तानां तामिहोपह्वये श्रियं। अनेन गोमयं• गायत्र्या गाथिनो विश्वामित्रः सविता
गायत्री• ॐ तत्सवितुर्वरे• अनया गोमूत्रं निक्षिप्य• सहिरत्नानीत्यस्य श्यावाश्वः
सविता गायत्री ॐ सहिरत्नानि दाशुषे सुवाति सविता भगः। तं भागं चित्रमीमहे।
अनेन रत्नानि• या ओषधीरित्यस्याथर्वणो भिषगोषधयोऽनुष्टुप्• ॐ या ओष
धीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा मनै नु बभ्रूणामहं शतं धामानि सप्त च इत्यने
न शतौषधानि तदभावे दश मूलानि सुवर्णं वा निक्षिप्य• गंधद्वारामिति गंधं•

शिव

५

काण्डात्काण्डादिति दूर्वाः

निक्षिप्य• सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः। आयान्तु यजमानस्य दुरितक्षयका
रकाः। गंगे च यमुने चैव गोदावरि सरस्वति• नर्मदे सिंधु कावेरि जलेस्मिन्सन्निधिं कुरु।
इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या। असिक्न्या मरुद्वृधे वितस्त
यार्जीकीये शृणुह्या सुषोमया• इत्येतैर्मंत्रैः ततः कुंभमभिमृश्य जपेत्• आपो हिष्ठे
ति नव र्चस्यांबरीषः सिंधुद्वीप आपो गायत्री• पंचमी वर्धमाना• सप्तमी प्रतिष्ठा अंत्ये द्वे
अनुष्टुभौ• जपे वि• ॐ आपो हिष्ठा मयो भुव इति नव• नहि तेक्षत्रमित्याद्येकविंशाम
जीगर्तिः शुनःशेपो वरुण आद्यो द्वादश त्रिष्टुभः शिष्टा गायत्र्यः अभिमंत्रणे विनियोगः
ॐ नहि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयन्त आपुः। नेमा आपो अनिमिषं चरंती
र्न ये वातस्य प्रमिनंत्यभ्वं। अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः नीची

नवम्र· स·

९

नाःस्थुरुपरिबुध्न एषामस्मे अंतर्निहिताः केतवस्युः । उरुं हि राजा वरुणश्चकार सूर्याय
पंथामन्वेतवाउ । अपदे पादा प्रतिधातवेकरुतापवक्ता हृदयाविधश्चित् । शतंते राज
न्भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु । बाधस्व दूरे निरृतिं पराचैः कृतं चिद
नः प्रमुमुग्ध्यस्मत् । अमी यऋक्षा निहितास उच्चा नक्तं ददृश्रे कुह चिद्दिवेयुः । अद
ब्धानि वरुणस्य व्रतानि विचाकशच्चंद्रमा नक्तमेति ॥ २ ॥ तत्वा यामि ब्रह्मणा वंदमा
नस्तदाशास्ते यजमानो हविर्भिः । अहेळमानो वरुणेह बोध्युरुशंस मान आयुः
प्रमोषीः । तदिन्नक्तं तद्दिवा मह्यमाहुस्तदयं केतो हृद आ विचष्टे । शुनःशेपो यमह्व
द्गृभीतः सो अस्मान्राजा वरुणो मुमोक्तु । शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु शिव
बद्धः । अवैनं राजा वरुणः ससृज्याद्विद्वाँ अदब्धो विमुमोक्तु पाशान् । अवते हेळो व ९

रुण नमोभिरव यज्ञेभिरीमहे हविर्भिः । क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शि
श्रथः कृतानि । उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय । अथा वयमादि
त्य व्रते तवानागसो अदितये स्याम ॥ १ ॥ यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतं । मि
नीमसि द्यविद्यवि । मा नो वधाय हत्नवे जिहीळानस्य रीरधः । मा हृणानस्य मन्य
वे । वि मृळीकाय ते मनो रथीरश्वं न संदितं । गीर्भिर्वरुण सीमहि । परा हि मे वि
मन्यवः पतंति वस्यइष्टये । वयो न वसतीरुप । कदा क्षत्रश्रियं नरमा वरुणं करामहे ।
नमो॰२ मृळीकायोरुचक्षसं ॥ २ ॥ तदित्समानमाशाते वेनंता न प्रयुछतः । धृतव्रताय दाशु
षे । वेदा यो वीनां पदमंतरिक्षेण पततां । वेद नावः समुद्रियः । वेद मासो धृतव्रतो
द्वादश प्रजावतः । वेदा य उपजायते । वेद वातस्य वर्तनिमुरोरृष्वस्य बृहतः ।

वेदायेअध्यासते। निषसाद धृतव्रतोवरुणः पस्त्यास्वा। साम्राज्यायसुक्रतुः ॥४॥
स्वादिष्ठयेतिदशर्चस्यमधुच्छंदाः पवमानसोमोगायत्री कलशाभिमंत्रणेवि०
ॐ स्वादिष्ठयामदिष्ठयापवस्वसोमधारया। इंद्रायपातवेसुतः। रक्षोहाविश्वचर्ष
णिरभियोनिमयोहतं। द्रुणासधस्थमासदत्। वरिवोधातमोभवमंहिष्ठोवृत्रहंतमः
पर्षिराधोमघोनां। अभ्यर्षमहानांदेवानांवीतिमंधसा। अभिवाजमुतश्रवः। त्वा
मच्छाचरामसितदिदर्थंदिवेदिवे। इंद्रोत्वेनआशसः॥१॥ पुनातितेपरिस्रुतंसोमंसू
र्यस्यदुहिता। वारेणशश्वतातना। तमीमण्वीःसमर्यआगृभ्णंतियोषणोदश। स्व
सारःपार्येदिवि। तमींहिन्वंत्यग्रुवोधमंतिबाकुरंदृतिं। त्रिधातुवारणंमधु। अभी
ममघ्न्याउतश्रीणंतिधेनवःशिशुं। सोममिंद्रायपातवे। अस्येदिंद्रोमदेष्वाविश्वा

वृत्राणिजिघ्नते। शूरोमघाचमंहते॥२॥ अनेनसूक्तेनचतंकुंभमभिमंत्रयेत्· यद्वाकल
शाभिमंत्रणेऽन्यमंत्रविदंनियुंजीत। ततःकर्मसंकल्पविधिवत्स्वस्तिवाचनंकृत्वाग्रह
वेदिपद्मपीठेयथास्थानंयथामुखीग्रहप्रतिमाःस्थापयित्वादक्षिणवामपार्श्वयोरधि
देवताप्रत्यधिदेवतेतदभिमुख्योस्थापयेत्· तदभावेपुष्पाक्षतादिषु आवाहयेत्·
तत्रायंप्रकारः व्यस्तसमस्तव्याहृतीनामात्रिभृगुभरद्वाजप्रजापतयऋषयः अग्नि
वायुसूर्यप्रजापतयोदेवताः गायत्र्युष्णिगनुष्टुप्बृहत्यश्छंदांसि· ॐ भूरादित्यमावा
हयामि· ॐ भुवआदित्यमावाह० ॐ स्वःआदित्यमावा० ॐ भूर्भुवस्वरादित्यमावाह०
आकृष्णेनेत्यस्यहिरण्यस्तूपःसविताऋत्रिष्टुप्· आवाहनेविनि० ॐ आकृष्णेनरज
सावर्त्तमानोनिवेशयन्नमृतंमर्त्यंच। हिरण्ययेनसवितारथेनादेवोयातिभुवना

नवग्र· प्र·

निपश्यन्नितिमंत्रमुच्चार्य भगवन्नादित्य ग्रहाधिपते काश्यपगोत्र कलिंगदेशेश्वर जपा
पुष्पोपमांगद्युते द्विभुज पद्माभयहस्त सिंदूरवर्णांबर माल्यानुलेपन ज्वलन्माणिक्य
खचित सर्वांगाभरणभास्वर तेजोनिधे त्रिलोकीप्रकाशक त्रिदेवतामयमूर्ते नमस्ते स
न्नद्धारुणध्वजपताकोपशोभितेन सप्ताश्वरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छाग्नि
रुद्राभ्यां सह पद्मकर्णिकायां ताम्रप्रतिमां प्राङ्मुखीं वर्तुले पीठे अधितिष्ठ पूजार्थं त्वामा
वाहयामि इत्यादित्यमावाहयेत्॥ तद्दक्षिणपार्श्वे· ॐ भूरादित्या[illegible]धिदेवम
ग्निमावाह· ॐ भुवरादित्याधिदेवमग्निमा· ॐ स्वरादित्याधिदेवमग्निमा· ॐ भूर्भुवः
स्वरादित्याधिदेवमग्निमावाहया· अग्निं दूतमित्यस्य काण्वो मेधातिथिरग्निर्गायत्री
ॐ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं। अस्य यज्ञस्य सुक्रतुं इमं मंत्रमुच्चार्य·

आ

शिव

पिंगभ्रूश्मश्रुकेशं पिंगाक्षं त्रिनयनं अरुणवर्णं छागस्थं साक्षसूत्रं सप्तार्चिषं शक्तिधरं वरह
स्तद्वयमादित्याधिदेवमग्निमावाहयामि· तद्वामपार्श्वे· ॐ भूरादित्यप्रत्यधिदेवं रुद्र
मावाहयामि· ॐ भुवः आदित्यप्रत्यधिदेवं रुद्रमा· ॐ स्वरादित्यप्रत्यधिदेवं रुद्रमा
वा· ॐ भूर्भुवः स्वरादित्यप्रत्यधिदेवं रुद्र· त्र्यंबकमित्यस्य वसिष्ठः त्र्यंबको नुष्टुप्·
ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं। उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्·
इमं मंत्रमुच्चार्य· त्रिलोचनं पंचवक्त्रं वृषारूढं कपालशूल खट्वांगधारिणं चंद्रमौलिं
सदाशिवमादित्यप्रत्यधिदेवं रुद्रमावाहयामि· तद्दक्षिणपूर्वदले· ॐ भूः सोममावाहया·
ॐ भुवः सोममावाहयामि· ॐ स्वः सोममा· ॐ भूर्भुवः स्वः सोममावाह· आप्यायस्वे
त्यस्य गौतमः सोमो गायत्री· ॐ आप्यायस्व समेतु ते विश्वतः सोम[illegible]ष्ण्यं· भवावा

नवग्र·प्र· जेस्यसंगृह्ये इमंमंत्रमुच्चार्य· भगवन्सोमद्विजाधिपतेसुधामयशरीरात्रिगोत्रयमुनादे
शेश्वरगोक्षीरधवलांगकांतेद्विभुजगदावरदानांकितकरशुक्लांबरमाल्यानुलेपन
सर्वांगामुक्तमौक्तिकाभरणरमणीयसमस्तलोकाप्यायकदेवतास्वाद्यमूर्तेनमस्तेसन्न
९ वल४ इंध्वजपताकोपशोभितेनदशश्वेताश्वरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छाद्विरु
मयावृसहपद्मआग्नेयदलमध्येस्फटिकप्रतिमांप्रत्यङ्मुखींचतुरस्त्रपीठेधितिष्ठ
पूजार्थंत्वामावाहयामि· तद्दक्षिणपार्श्वे· ॐ भूः सोमाधिदेवता अपः आवाहयामि·
ॐ भुवः सोमाधिदेवता अपः आवाह॰ ॐ स्वः सोमाधिदेवता अपः आवा॰ ॐ भूर्भुवः स्वः
सोमाधिदेवता अपः आवा॰ अप्सुमइत्यस्य सिंधुद्वीपआपोगायत्री· ॐ अप्सुमेसो
मोअब्रवीदंतर्विश्वानिभेषजा। अग्निंचविश्वशंभुवं इमंमंत्रमुच्चार्य· स्त्रीरूपधारिणीः शिव
९

श्वेतवर्णमकरवाहनाः पाशकलशधारिणीमुक्ताभरणभूषिताः सोमाधिदेवता अपः
आवाहयामि· तद्वामपार्श्वे· ॐ भूः सोमप्रत्यधिदेवतामुमामावाहया॰ ॐ भुवः सोम
प्रत्यधिदेवतामुमामावा॰ स्वः सोमप्रत्यधिदेवतामुमामा॰ ॐ भूर्भुवः स्वः सोमप्रत्य
धिदेवतामुमामा॰ गौरीर्मिमेत्यस्य दीर्घतमाउमाजगती· ॐ गौरीर्मिमायसलिला
नितक्षत्येकपदीद्विपदीसाचतुष्पदी· अष्टापदीनवपदीबभूवुषीसहस्राक्षरा
परमेव्योमन्। इमंमंत्रमुच्चार्य· अक्षसूत्रकमलदर्पणकमंडलुधारिणींत्रिद
शपूजितांसोमप्रत्यधिदेवतामुमामावाहयामि दक्षिणदले ॐ भूरंगारकमा
वा॰ ॐ भुवरंगारकमावा॰ ॐ स्वरंगारकमा॰ ॐ भूर्भुवः स्वरंगारकमा॰ अग्नि
र्मूर्धेत्यस्य विरूपोंगारकोगायत्री· ॐ अग्निर्मूर्धादिवः ककुत्पतिः पृथिव्या अयं

नवग्र॰ प्र॰

अपां रेतांसि जिन्वति॰ इमं मंत्रमुच्चार्य॰ भगवन्नंगारकाग्न्याकृते भारद्वाजगोत्रावंतिदेशे
श्वर ज्वालापुंजोपमांगद्युते चतुर्भुज शक्तिशूलगदाखट्वांगधारिन् रक्तांबरमाल्यानु
लेपन प्रवालाभरणभूषित सर्वांग दुःखशोकदीप्ते नमस्ते सन्नस [illegible] रक्तध्वजपता
१० कोपशोभितेन रक्तमेषरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ भूमिस्कंदाभ्यां सह
पद्मदक्षिणदलमध्ये रक्तचंदनप्रतिमां दक्षिणामुखीं त्रिकोणपीठे धितिष्ठ पूजा
र्थं त्वामावाह॰ तद्दक्षिणपार्श्वे॰ ॐ भूरंगारकाधिदेवतां भूमिमावा॰ ॐ भुवोंगा
रकाधिदेवतां भूमिमा॰ ॐ स्वरंगारकाधिदेवतां भूमिमा॰ ॐ भूर्भुवः स्वरंगार
काधिदेवतां भूमिमा॰ स्योना पृथिवीत्यस्य मेधातिथिः पृथिवी गायत्री॰ ॐ स्यो शिव
ना पृथिवि भवानृक्षरा निवेशनी॰ यच्छा नः शर्म सप्रथः॰ इमं मंत्रमुच्चार्य॰ शुक्लवर्णां १०

दिव्याभरणभूषितां चतुर्भुजां सौम्यवपुषं वंशांशुसदृशांबरां रत्नपात्रसस्यपात्रौषधि
पात्रपद्मोपेतकरां चतुर्दिङ्भागपृष्ठगतां अंगारकाधिदेवतां भूमिमावाहयामि॰ तद्वा
मपार्श्वे॰ ॐ भूरंगारकप्रत्यधिदेवं स्कंदमावा॰ ॐ भुवोंगारकप्रत्यधिदेवं स्कंदमा॰
ॐ स्वरंगारकप्रत्यधिदेवं स्कंदमावा॰ ॐ भूर्भुवः स्वरंगारकप्रत्यधिदेवं स्कंद॰ कुमार
श्चित्पितरमित्यस्य गृत्समदः स्कंदस्त्रिष्टुप्॰ इमं मंत्रमुच्चार्य॰ षण्मुखं शिखंडकवि कुमारश्चित॰
भूषणं रक्तांबरधरं मयूरवाहनं कुक्कुटघंटापताकाशक्त्युपेतं चतुर्भुजमंगारकप्र
त्यधिदेवतां स्कंदमावाहयामि॰ ततः प्रागुत्तरदले ॐ भूर्बुधमावा॰ ॐ भुवो बुध
मावा॰ ॐ स्वर्बुधमावा॰ ॐ भूर्भुवः स्वर्बुधमा॰ उद्बुध्यध्वमित्यस्य बुधः सौम्यस्त्रिष्टु
प्॰ ओं उद्बुध्यध्वं समनसः सखायः समग्निमिंधं बहवः सनीळाः। दधिक्रामग्नि

सुषसं वदेवी मिंद्रावतो वसे निर्ऋषिकः। इमं मंत्रमुच्चार्य भगवन्सौम्य सौम्याकृते सर्वज्ञा
न मयात्रिगोत्र मगधदेशेश्वर कुंकुमवर्णांग द्युते चतुर्भुज खड्ग खेट गदा वरदानां कित
पीतांबर माल्यानुलेपन भरकृताभरणालंकृत सर्वांग विबुधमतेन मस्ते संन्नद्ध
पीनपताकोपशोभितेन चतुःसिंहरथवाहनेन मेरुं प्रदक्षिणी कुर्वन्नागच्छ विष्णु
पुरुषाभ्यां सह पद्मेशानदलमध्ये स्ववर्णप्रतिमद उन्मुखी बाणाकारपीठे अधि
तिष्ठ पूजार्थं त्वामावाहयामि॰ ततस्तत्पार्श्वयोरधिप्रत्यधिदेवतयोरावाहनं॰ तद्द
क्षिणपार्श्वे ॐ भूः सौम्याधिदेवं विष्णुमावाहया॰ ॐ भुवः सौम्याधिदेवं विष्णुमा॰
ॐ स्वः सौम्याधिदेवं विष्णुमा॰ ॐ भूर्भुवः स्वः सौम्याधिदेवं विष्णुमा॰ इदं विष्णु
रित्यस्य काण्वो मेधातिथिर्विष्णुर्गायत्री॰ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे प ११

दं। समूढमस्य पांसुरे। कौमोदकीपद्मशंखचक्रोपेत चतुर्भुजं सौम्याधिदेवं विष्णु
मावाहयामि। तद्वामपार्श्वे॰ ॐ भूः सौम्यप्रत्यधिदेवं पुरुषमावा॰ ॐ भुवः सौम्यप्र
त्यधिदेवं पुरुषमा॰ ॐ स्वः सौम्यप्रत्यधिदेवं पुरुषमावा॰ ॐ भूर्भुवः स्वः सौम्यप्रत्य
धिदेवं पुरुषमावा॰ सहस्रशीर्षेत्यस्य नारायणः पुरुषोनुष्टुप्॰ ॐ सहस्रशीर्षा
पुरुषः सहस्राक्षः सहस्रपात्॰ स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं कौमो
दकीपद्मशंखचक्रोपेतं चतुर्भुजं सौम्यप्रत्यधिदेवं पुरुषमावाहयामि॰ ॥ उ
त्तरदले॰ ॐ भूः बृहस्पतिमावाह॰ ॐ भुवो बृहस्पतिमावा॰ ॐ स्वः बृहस्पतिमा
वा॰ ॐ भूर्भुवः स्वः बृहस्पतिमावा॰। बृहस्पते अतीत्यस्य गृत्समदो बृहस्पति
स्त्रिष्टुप्॰ ॐ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु॰ यद्दीदय

वसन्तऋतप्रजा ततहस्तामद्रविणं धेहि मित्रं। भगवन्बृहस्पते समस्तदेवतानां
यांगिरसगोत्र सिंधुदेशेस्वरदी [illegible] दंडकमंडलु [illegible]
[illegible] वरदानां कितपीतांबर माल्यां [illegible] लेपन पुष्प [illegible]
[illegible] विद्याधिपते नमस्ते। [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

पोर्षरयीणामरिष्टिंतन्नोंस्याद्यानेवान्वः स्कंदिनत्वमङ्क्तो। चतुर्दंतगजारुढं वज्रांकुशध
रं शचीपतिं नानाभरणभूषितं बृहस्पत्यधिदेवतामिंद्रमावाहयामि· तद्वामपार्श्वे· ॐ
भूर्बृहस्पतिप्रत्यधिदेवं ब्रह्माणमा० ॐ भुवो बृहस्पतिप्रत्यधिदेवं ब्रह्माण० ॐ स्वर्बृहस्प
तिप्रत्यधिदेवं ब्रह्माणमा० ॐ भूर्भुवः स्वर्बृहस्पतिप्रत्यधिदेवं ब्रह्माण० ब्रह्मणा तेब्र
ह्मयुजेत्यस्य विश्वामित्रो ब्रह्मा त्रिष्टुप्· ॐ ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया
सधमाद आश्र। स्थिरं रथं सुखमिंद्राधितिष्ठन्प्रजानन्विद्वाँ उपयाहि सोमं· पद्मा
सनस्थं जटिलं चतुर्मुखं अक्षमालास्रुक्पुस्तककमंडलुधारिणं कृष्ण। जिनवाससं
पार्श्वस्थित हंसं बृहस्पतिप्रत्यधिदेवतां ब्रह्माणमावाहयामि· प्राग्दले· ॐ भूः शुक्र
मावाहयामि· ॐ भुवः शुक्रमावाह० ॐ स्वः शुक्रमावाह० ॐ भूर्भुवः स्वः शुक्रमावा०

शुक्रं ते अन्यदित्यस्य भरद्वाजः शुक्रस्त्रिष्टुप्॰ ॐ शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अ
हनी द्यौरिवासि। विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु। भगवन्भा
र्गव समस्तदैत्यगुरो भार्गवसगोत्र भोजकटदेशेश्वर रजतोज्ज्वलांगकांते चतुर्भुज दंड
 कमंडलु अक्षसूत्र वरदानांकित शुक्लांबर माल्यानुलेपन वज्राभरणभूषित सर्वांग
समस्तनीतिशास्त्रनिपुण मतेन मस्ते॰ सन्नद्ध शुक्लध्वजपताकोपशोभितेन शुक्ला
श्वसहितेन रथेन मेरुं प्रदक्षिणीकुर्वन्नागच्छेंद्राणींद्राग्निभ्यां सह पद्मपूर्वदलम
ध्ये रजतप्रतिमां प्राङ्मुखीं पंचकोणपीठे धितिष्ठ पूजार्थं त्वामावाहयामि॰ तद्दक्षि
णपार्श्वे॰ ॐ भूः शुक्राधिदेवतामिंद्राणीमा॰ ॐ भुवः शुक्राधिदेवतामिंद्राणीमा॰ शिव
ॐ स्वः शुक्राधिदेवतामिंद्राणीमा॰ ॐ भूर्भुवः स्वः शुक्राधिदेवतामिंद्राणीमावाह॰ १२

विश्वस्मादिंद्र उत्तरः॰

इंद्राणीमास्वित्यस्य वृषाकपिरिंद्राणी पंक्तिः॰ ॐ इंद्राणीमासु नारिषु सुभगामह
मश्रवं। नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिंद्र उत्तरः। संतानमंजरीवरदा
नधरद्विभुजा शुक्राधिदेवतामिंद्राणीमावाहयामि॰ वामपार्श्वे॰ ॐ भूः शुक्रप्रत्यधि
देवमिंद्रमावाह॰ ॐ भुवः शुक्रप्रत्यधिदेवमिंद्र॰ ॐ स्वः शुक्रप्रत्यधिदेवमिंद्र॰ ॐ भू
र्भुवः स्वः शुक्रप्रत्यधिदेवमिंद्र॰ इंद्रमिद्देवतातय इत्यस्य मेधातिथिरिंद्रः प्रगाथो बृहती
ॐ इंद्रमिद्देवतातय इंद्रं प्रयत्यध्वरे। इंद्रं समीके वनिनो हवामह इंद्रं धनस्य सातये॰
चतुर्दंतगजारूढं वज्रांकुशधरं शचीपतिं नानाभरणभूषितं भार्गवप्रत्यधिदेवता
मिंद्रमावाहयामि॰ पश्चिमदले॰ ॐ भूः शनैश्चरमा॰ ॐ भुवः शनैश्चरमा॰ ॐ स्वः श
नैश्चरमा॰ ॐ भूर्भुवः स्वः शनैश्चरमा॰ शमग्निरित्यस्य रिरिंबिठिः शनैश्चर उष्णिक्॰

नवग्र· प्र·

१४

ॐ शमग्निरग्निभिः करच्छंनस्तपतु सूर्यः शंवातोवात्वरपाअपस्रिधः भगवन्शनै
श्चर भास्करतनय काश्यपगोत्र सौराष्ट्रदेशेश्वर कज्जलसमानांगकांते चतुर्भुज
चापतूणीर कृपाणी भयांकित नीलांबरमाल्यानुलेपन नीलरत्नभूषणालंकृतस
र्वांग समस्तभुवनभीषणामर्षमूर्त्ते नमस्ते सन्नद्धनीलध्वजपताकोपशोभितेन
नीलगृध्ररथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ प्रजापतियमाभ्यां सहपद्मपश्चि
मदलेमध्ये कालायसप्रतिमां प्रत्यङ्मुखीं चापाकारपीठेधितिष्ठ पूजार्थं त्वामा०॥
तद्दक्षिणपार्श्वे· ॐ भूः शनैश्चराधिदेवं प्रजापतिमा० ॐ भुवः शनैश्चराधिदेवंप्र
जापतिं० ओंस्वः शनैश्चराधिदेवंप्रजापतिं० ॐ भूर्भुवःस्वः शनैश्चराधिदेवंप्रजा०
प्रजापतेनत्वदित्यस्य हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्· आवाह० ॐ प्रजापतेन

त्वदेतान्यन्यो विश्वाजातानि परिताबभूव। यत्कामास्तेजुहुमस्तन्नो अस्तुवयंस्या
मपतयोरयीणां। यज्ञोपवीतिनं हंसस्थमेकवक्त्रं अक्षमालास्रुवपुस्तककमंडलुस
हितंचतुर्भुजं शनैश्चराधिदेवतां प्रजापतिमावाहयामि· तद्वामपार्श्वे· ॐ भूः शनैश्च
रप्रत्यधिदेवंयममावा० ॐ भुवः शनैश्चरप्रत्यधिदेवंयम० ॐ स्वः शनैश्चरप्रत्यधिदे
वंयम० ॐ भूर्भुवःस्वः शनैश्चरप्रत्यधिदेवंयम० यमायसोमंसुनुतेत्यस्य यमोय
मोनुष्टुप्· आवाह० ॐ यमायसोमंसुनुत यमायजुहुता हविः। यमंहयज्ञो गच्छत्य
ग्निदूतो अरंकृतः। ईषत्पीनं दंडहस्तं रक्तसदृशं पाशधरं कृष्णवर्णं महिषारूढं स
र्वाभरणभूषितं शनैश्चरप्रत्यधिदेवतां यममा०। प्रत्यग्दक्षिणदलाग्रे· ॐ भूराहुमा०
ॐ भुवोराहुमावा० ॐ स्वाराहुमा० ॐ भूर्भुवःस्वाराहुमावाहया० कयानश्चित्रइ

नवग्र·प्र· स्यस्यवामदेवोराहुर्गायत्री· आवा॰ ॐ कयानश्चित्र आभुवदूतीसदावृधः सखा। कया
शचिष्ठयावृता। भगवन्राहोरविसोममर्दन सिंहिकानंदन पैठीनसि गोत्र बर्बरदे
शेश्वर कालमेघद्युते व्याघ्रवदन चतुर्भुज खड्ग चर्मशूलवरदानांकित कृष्णांबरमा
१५ ल्यानुलेपन गोमेदकाभरणभूषितसर्वांग शौर्यनिधे नमस्ते· सन्नद्धकृष्णध्वजपता धे
कोपशोभितेन कृष्णसिंहरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ सर्पकालाभ्यां सह प
श्चिमे नैर्ऋते दलमध्ये सीसकप्रतिमां दक्षिणामुखीं शूर्पाकारपीठे धितिष्ठ पूजार्थं त्वा
मावाहयामि· तद्दक्षिणपार्श्वे· ॐ भूः राह्वाधिदेवान्सर्पानावाह॰ ॐ भुवो राह्वा
धिदेवान्सर्पानावा॰ ॐ स्वः राह्वाधिदेवान्सर्पाना॰ ॐ भूर्भुवः स्वः राह्वाधिदेवान् शिव
सर्पाना॰ आयंगौरित्यस्य सार्पराज्ञी सर्पा गायत्री· आवा॰ आयंगौः पृश्निरक्रमी १५

रसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः। अक्षस्रजधरान्कुंडलिकाकार पुच्छयुक्तान् कमो
न्त्रस्त्रीभोगा गान्भीषणान्राह्वधिदेवताः सर्पानावाहयामि· वामपार्श्वे· ॐ भूः राहुप्रत्यधिदेवं का
लमावा॰ ॐ भुवो राहुप्रत्यधिदेवं कालमा॰ ॐ स्वः राहुप्रत्यधिदेवं कालमा॰ ॐ भूर्भुवः
स्वः राहुप्रत्यधिदेवं काल॰ परंमृत्यो रित्यस्य संकुसुको मृत्युर्गायत्रिष्टुप्· आवाह॰
ॐ परंमृत्यो अनुपरेहि पंथां यस्ते स्व इतरो देवयानात्· चक्षुष्मते शृण्वते ते ब्रवीमि
मा नः प्रजां रीरिषो मोत वीरान्· करालवदनं नित्यं गंभीषणं पाशदंडधरं सर्पवृश्चिक
रोमाणं राहुप्रत्यधिदेवतां कालमावाह॰ प्रत्यग्र उत्तरदले· ॐ भूः केतुमावा॰ ॐ भुवः के
तुमा॰ ॐ स्वः केतुमावा॰ ॐ भूर्भुवः स्वः केतुमावा॰ केतुं कृण्वन्नित्यस्य मधुच्छंदाः केतु
र्गायत्री· आवा॰ ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः॥ ॥

भगवन्केतो कामरूपजैमिनिगोत्रमध्यदेशेश्वरधूम्रवर्णध्वजाकृते द्विभुजगदावरदानां
कितचित्रांबरमाल्यानुलेपनवैडूर्यमयाभरणभूषितसर्वांगचित्रशक्ते नमस्ते सन्नद्ध
चित्रध्वजपताकोपशोभितेन चित्रकपोतरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ
ब्रह्मचित्रगुप्ताभ्यां सहवायव्यदलमध्ये कांस्यप्रतिमां दक्षिणाभिमुखीं ध्वजाकारपीठे
धितिष्ठ पूजार्थं त्वामावाहयामि· तद्दक्षिणपार्श्वे· ॐ भूः केत्वधिदेवं ब्रह्माणमावाहया·
ॐ भुवः केत्वधिदेवं ब्रह्माणमा० ॐ स्वः केत्वधिदेवं ब्रह्माण० ॐ भूर्भुवः स्वः केत्व
धिदेवं ब्रह्माण० ब्रह्मजज्ञानमित्यस्य नकुलो ब्रह्मा त्रिष्टुप्· आवा० ॐ ब्रह्मजज्ञा
नं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः स बुध्न्या उपमा अस्य विष्ठाः सतश्च
योनिमसतश्च विवः· पद्मासनस्थं जटिलं चतुर्मुखं अक्षमालास्रुवपुस्तककमंडलु

धरं कृष्णाजिनवाससं पार्श्वस्थितहंसं केत्वधिदेवतां ब्रह्माणमावाहयामि· वामपार्श्वे· ॐ
भूः केतुप्रत्यधिदेवं चित्रगुप्तमावाहयामि· ॐ भुवः केतुप्रत्यधिदेवं चित्रगु० ॐ स्वः के
तुप्रत्यधिदेवं चित्रगुप्त० ॐ भूर्भुवः स्वः केतुप्रत्यधिदेवं चित्रगु० सचित्रमित्यस्य भर
द्वाजः श्चित्रगुप्तस्त्रिष्टुप्· ॐ सचित्र चित्रं चितयंतमस्मे चित्रक्षत्र चित्रतमं वयोधां ।
चंद्रं रयिं पुरुवीरं बृहंतं चंद्र चंद्राभिर्गृणते युवस्व । उदीच्यवेषधरं सौम्यदर्शनं लेख
नीपत्रोपेतं द्विभुजं केतुप्रत्यधिदेवतां चित्रगुप्तमावाह० ॥ अथ कर्मसाद्गुण्यकरदेव
तावाहनं शुक्लतंडुलपीठेषु कुर्यात्· तत्रायं क्रमः शनेर्वामप्रदेशे· ॐ भूः विनायकमा०
ॐ भुवो विनाय० ॐ स्वः विनायक० ॐ भूर्भुवः स्वः विनाय० आतूनइंद्रेत्यस्य काण्वः
कुसिदी विनायको गायत्री· ॐ आतूनइंद्र क्षुमंतं चित्रंग्राभं संगृभाय । महाहस्तीद

नवग्र·प्र·

१७

क्षिणेन। चतुर्भुजंत्रिनेत्रंगजाननंनागयज्ञोपवीतिनंचंद्रधरंदंताक्षमालापरशुमोदको
पेतचतुर्भुजंविनायकमावाहयामि· तद्दक्षिणतः ॐभूः दुर्गामावाह॰ ॐभुवो दुर्गामा
वा॰ ॐस्वः दुर्गामावा॰ ॐभूर्भुवःस्वः दुर्गामावा॰ ~~आवाह~~॰ जातवेदसइत्यस्यकश्य
पोदुर्गात्रिष्टुप्· आवाह॰ ॐजातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः।स
नःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥ शक्तिबाणशूलखड्गचक्रचंद्र
बिंबखेटकपालशूलटंकोपेतदशभुजांसिंहारूढांदुर्गाख्यदैत्यासुरहारिणींदुर्गामा
वाहयामि· तद्दक्षिणतः ॐ भूः क्षेत्रपालमावा॰ ॐभुवः क्षेत्रपालमा॰ ॐस्वः क्षेत्रपालमा॰
ॐभूर्भुवःस्वः क्षेत्रपाल॰ क्षेत्रस्यपतिनेत्यस्यवामदेवः क्षेत्रपालोनुष्टुप्· आवाह॰
ॐ क्षेत्रस्यपतिनावयंहितेनेवजयामसि। गामश्वंपोषयित्न्वासनोमृळातीदृशे॥

शिव

१७

पृष्ठ

श्यामवर्णंत्रिलोचनंमूर्धकेशंभद्रदंष्ट्रंभ्रुकुटीकुटिलाननंनूपुरालंकृतांघ्रिंसर्पमेख
लयायुतसर्वांगमतिक्रूरंरक्षद्घंटिकाबद्धगुल्फावलंबिकरोटिकामालाधारिण
मुरगकौपीनंबद्धमौलिंदक्षिणहस्ते· शूलवेतालखड्गडमरून्दधानंवामह
स्ते: कपालघंटाचर्मचापान्दधानंभीमंदिग्वाससंअमितद्युतिंक्षेत्रपालमावा
हयामि· तद्दक्षिणतो ॐभूः वायुमावा॰ ॐभुवो वायुमा॰ ॐस्वः वायुमा॰ ॐ
भूर्भुवःस्वः वायुमावा॰ कर्णाशिशुरित्यस्यत्रितोवायुरनुष्णिक्· आवा॰ ॐ
कर्णाशिशुर्महीनांहिन्वन्नृतस्यदीधितिं। विश्वापरिप्रियाभुवदधद्विता।
धावद्धरिणपृष्ठगतंध्वजवरदानधारिणंधूम्रवर्णंवायुमावाहयामि। तद्दक्षिण
तोॐ आदित्प्रत्नस्येत्यस्यवत्सोंतरिक्षं गायत्री·

ॐभूः अंतरिक्षमा॰ ॐभुवो अंतरिक्षमा· ॐस्वरंतरिक्षमा॰
ॐभूर्भुवःस्वरंतरिक्षमावाह॰ १

ॐ आदित्यप्रत्नस्यरेतसोज्योतिष्पश्यंतिवासरं। परोयदिध्यतेदिवा। नीलोत्पलाभंनीलांबरधारिणंस्वेंक्रोकेपितंद्विभुजंषंढमाकाशमावाहयामि·। तद्दक्षिणतः ॐ भूरश्विनावावाह० ॐ भुवोश्विनावावा० ॐ स्वरश्विनावावा० ॐ भूर्भुवःस्वरश्विनावावा०
अश्विनावर्त्तिरस्मदित्यस्यराहूगणोगोतमोश्विनावुष्णिक्·ॐ अश्विनावर्त्तिरस्मदागोमद्दस्राहिरण्यवत्। अर्वाग्रथंसमनसानियच्छतं। प्रत्येकमोषधीपुस्तकोपेतदक्षिणवामहस्तावन्योन्यसंयुक्तदेहावेकस्यदक्षिणपार्श्वेपरस्यवामपार्श्वेरत्नभांडकरशुक्लांबरधारिणौनारीयुग्मोपेतौदेवभिषजावश्विनावावाहयामि॥
अथक्रतुसंरक्षकदेवतावाहनंपूर्ववत्तंडुलपीठेषुकुर्यात्·। तद्यथा· तत्रप्राग्दलाग्रे· ॐ भूरिंद्रमावा० ॐ भुवरिंद्रमावा० ॐ स्वरिंद्रमावा० ॐ भूर्भुवःस्वरिंद्रमावा० शिव· १८

इंद्रंवइत्यस्यमधुछंदाइंद्रोगायत्री· ॐ इंद्रंवोविश्वतस्परिहवामहेजनेभ्यः। अस्माकमस्तुकेवलः। स्वर्णवर्णंसहस्राक्षंवज्रपाणिंशचीप्रियंइंद्रमावाहयामि·। आग्नेयदलाग्रे· ॐ भूरग्निमावाहयामि· ॐ भुवोग्निमा० ॐ स्वरग्निमावा० ॐ भूर्भुवःस्वरग्निमावाह० अग्निमीळइत्यस्यमधुछंदाअग्निर्गायत्री· ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं। होतारंरत्नधातमं। स्वर्णवर्णंमप्तार्चिषंसहस्तंशक्तयनस्रुकस्रुववंताभरव्यंजनंपात्राणिदधानंस्वाहाप्रियंमेषवाहनमग्निमावाहया
घृत ६ मि। याम्यदलाग्रे· ॐ भूः यममावाह० ॐ भुवोयममावा० ॐ स्वःयममावा० ॐ भूर्भुवःस्वःयममा० यमायसोममित्यस्ययमोयमोनुष्टुप्· ॐ यमायसोमंसुनुतयमायजुहुताहविः। यमंहयज्ञोगच्छत्यग्निदूतोअरंकृतः। रक्तवर्णंदंडधरंमहि

षवाहनमिकाप्रियंयममावाहयामि॰ नैर्ऋतिदलाग्रे॰ ॐ भूः निर्ऋतिमावा॰ ॐ भुवो
निर्ऋति॰ ॐ स्वः निर्ऋतिमावा॰ ॐ भूर्भुवःस्वः निर्ऋति॰ मोषुणइत्यस्यघोरःकण्वोनिर्ऋ
तिर्गायत्री॰ आवा॰ ॐ मोषुणःपरापरानिर्ऋतिर्दुर्हणावधीत्॰ पदीष्टतृष्णयासह। नी
लवर्णंखड्गचर्मधरंऊर्ध्वकेशंनरवाहनंकालिकाप्रियंनिर्ऋतिमा॰ पश्चिमदलाग्रे॰ ॐ
भूः वरुणमा॰ ॐ भुवोवरुणमा॰ ॐ स्वः वरुण॰ ॐ भूर्भुवःस्वः वरुण॰ उदुत्तमंमुमुग्धि
नइत्यस्यशुनःशेपोवरुणोगायत्री॰ आवा॰ ॐ उदुत्तमंमुमुग्धिनोविपाशंमध्यमंवृ
त। अवाधमानिजीवसे। रक्तभूषणंनागपाशधरंमकरवाहनंपद्मिनीप्रियंस्वर्ण
वर्णंवरुणमावाह॰। वायव्यदलाग्रे॰ ॐ भूर्वायुमा॰ ॐ भुववायुमा॰ ॐ स्ववायुमा॰
ॐ भूर्भुवस्स्ववायुमा॰। तववायइत्यस्य आंगिरसोव्यश्वावायुर्गायत्री आवाह॰ ॐ

तववायवृतस्पतेत्वष्टुर्जामातरद्भुत॰ अवांस्यावृणीमहे। श्यामवर्णंहेमदंडधरंकृष्णमृ
गवाहनंजगत्त्राणरूपंमोहिनीप्रियंवायुमावाह॰। उत्तरदलाग्रे॰ ॐ भूः कुबेरमावा॰
ॐ भुवः कुबेरमा॰ ॐ स्वः कुबेरमा॰ ॐ भूर्भुवःस्वः कुबेरमा॰ सोमोधेनुमित्यस्यगौ
तमःकुबेरस्त्रिष्टुप्॰ आवा॰ ॐ सोमोधेनुंसोमोअर्वंतमाशुंसोमोवीरंकर्मण्यंदधा
ति। सादन्यंविदथ्यंसभेयंपितृश्रवणंयोददाशतस्मै। स्वर्णवर्णंनिधीश्वरंकुं
तपाणिंअश्ववाहनंतितिणीप्रियंकुबेरमावाहयामि। ऐशानदलाग्रे॰ ॐ भूरीशा
नमावा॰ ॐ भुवईशानमावा॰ ॐ स्वरीशान॰ ॐ भूर्भुवःस्वरीशानमा॰ कद्रुद्रायेे
त्यस्यकण्वोरुद्रोगायत्री॰ आवा॰ ॐ कद्रुद्राय प्रचेतसेमीढुष्टमायतव्यसे। वोचेम
शंतमंहृदे। शुद्धस्फटिकवर्णंवरदाभयशूलाक्षसूत्रधरं वृषवाहनंगौरीप्रियमी

शानमावाहयामि· एवमेकचत्वारिंशद्देवता आवाह्य कलशे वरुणं पूर्वोक्तवदावाहन
मोंतैः श्चतुर्थ्यंतैः स्वस्वनामभिः क्रमेण पूर्वोक्तद्रव्यैः पुष्पसमर्पणपर्यंतां ग्रहदेवता
पूजां कृत्वा कर्मसाद्गुण्यदेवताः क्रतुसंरक्षकदेवतावरणं च मलयजगंधशतपत्रपुष्पै
स्तथैव पूजयेत् ॥ अथ होमः ॥ नवसमिच्चर्वाज्यैः प्रतिद्रव्यं प्रतिग्रहं एकावराभिः
सहस्रपराभिराहुतिभिर्निमित्तशक्त्यनुसारेण प्रधानदेवतांशेन पार्श्वदेवतानां
तदर्धेनेतरेषां स्वाहांतैर्नामभिस्तत्तन्मंत्रैर्वा पाणिनैव सकृद्दवदानेन चरुहोमः ।
तत्र आचार्यः प्रत्यगग्नेरासीनः प्राणानायम्य पूर्ववत्संकल्प्याग्निमुखं वक्ष्यमाण
प्रकारेण प्रागुक्तलक्षणे कुंडे स्थंडिले वा पलेपाद्यग्निप्रतिष्ठापनांतं कृत्वा ऋत्विग
न्वारब्धः समिद्वयमादाय देशकालौ निर्दिश्याद्य यक्ष्यमाणग्रहहोमे देवतापरिग्र २०

यज्ञे

हार्थमन्वाधानं करिष्ये· अस्मिन्नन्वाहिते ऽग्नौ इत्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा प्रधा
नदेवतामादित्यमधिदेवतामग्निं प्रत्यधिदेवं रुद्रं अर्कसमिच्चर्वाज्यैः । प्रधानदेवं सो
मं अधिदेवतामपः प्रत्यधिदेवतां गौरीं पलाशसमिच्चर्वाज्यैः । प्रधानदेवतामंगारकं
अधिदेवतां भूमिं प्रत्यधिदेवतां स्कंदं खदिरसमिच्चर्वाज्यैः । प्रधानदेवं बुधमधिदेवं
विष्णुं प्रत्यधिदेवं पुरुषं अपामार्गसमिच्चर्वाज्यैः प्रधानदेवं बृहस्पतिमधिदेवमि
द्रं प्रत्यधिदेवं ब्रह्माणमश्वत्थसमिच्चर्वाज्यैः प्रधानदेवं शुक्रमधिदेवतामिंद्राणीं
प्रत्यधिदेवमिंद्रं औदुंबरसमिच्चर्वाज्यैः । प्रधानदेवं शनिमधिदेवं प्रजापतिं प्रत्य
धिदेवं यमं शमीसमिच्चर्वाज्यैः प्रधानदेवं राहुं अधिदेवं सर्पं प्रत्यधिदेवं कालं दू र्व
र्वा समिच्चर्वाज्यैः प्रधानदेवं केतुं अधिदेवं ब्रह्माणं प्रत्यधिदेवं चित्रगुप्तं कुशसमिच्च

मां

र्ज्यैर्विवक्षितसंख्याकैः पार्श्वदेवताः प्रधानदशांशेन क्रतुसाद्गुण्यदेवताः वि
नायकं दुर्गां क्षेत्रपालं वास्तुमाकाशमश्विनौ क्रतुसंरक्षदेवताः इंद्रमग्निं यमं निऋ
२१ तिं वरुणं वायुं कुबेरमीशानं प्रधानदशांशेन अग्निवायुसूर्यप्रजापतीं स्तिलव्री
हिभिर्विवक्षितसंख्यया· सूर्यमाज्येन त्रयोदशवारं अग्निं चतुस्त्रिंशद्वारं द्वात्रिं
शद्वारं रुद्रं शेषेणास्विष्टकृतमित्यादि सद्योयक्ष्य इत्यंतमुक्त्वा· ॐ भूर्भुवः स्वः स्वा
हेत्यग्नावाधाय प्रजापतय इदं न ममेत्युद्देशत्यागौ कुर्यात्· ततो बर्हिः सन्नहना
द्याज्यदर्व्याद्यन्वयनिधानांतं कृत्वा लौकिकासिद्धान्नतिलव्रीहिभिः सहाज्यं
त्रिः पर्यग्निकृत्वाज्यमुद्वास्य बर्हिषि निधाय स्रुवस्रुक्संमार्जनं कृत्वा चरुं पा
त्रांतरे पृथक्कृत्याग्नावधिश्रित्य स्रुवेणाभिघार्योदगुद्वास्याज्याद्दक्षिणतो ब २१

र्हिष्यासाद्य प्रत्यगभिघार्याग्न्यलंकरणाद्याज्यभागांतं कृत्वा· क्रमेणादित्यादीशानांते
भ्य एकचत्वारिंशद्देवेभ्य आवाहनोक्तैस्तत्तन्मंत्रैः समिच्चर्वाज्यैः प्रागुक्तसंख्या
का आहुतीर्जुहुयात्· तत्रायं प्रकारः। समिधं मूलतोऽङ्गुलं विहाय मध्य
मानामिकांगुष्ठैर्गृहीत्वा जुहुयात्। चरुं ग्राससमं पाणिनैव। आज्यं स्रुवे
णैव तदभावेऽश्वत्थपर्णेन वा· ततो व्यस्तसमस्तव्याहृतिभिः प्रभूततिलव्रीहि
न्पाणिना हुत्वा सूर्यपावकरुद्रानाज्येन जुहुयान्मंत्रैः। ते च मंत्राः॥ सूर्यो नो
इति पंचर्चस्य सूक्तस्य सूर्यपुत्रः चक्षुः सूर्यो गायत्री· ग्रहमखांगआज्यहो
मे विनि· ॐ सूर्यो नो दिवस्पातु वातो अंतरिक्षात्· अग्निर्नः पार्थिवेभ्यः। जोषा
सवितर्यस्य ते हरः शतं सवाँ अर्हति। पाहि नो दिद्युतः पतंत्याः। चक्षुर्नो देवः

सविताचक्षुर्नउतपर्वतः। चक्षुर्धाताद्धधातुनः। चक्षुर्नोधेहिचक्षुषेचक्षुर्विख्यैतनू
भ्यः। संचेदंविचपश्येम। सुसंदृशंत्वावयंप्रतिपश्येमसूर्य। विपश्येमनृचक्षसः।
उदुत्यमित्यस्यकाण्वःप्रस्कण्वःसूर्योगायत्री॰ आज्यहो॰ ॐ उदुत्यंजातवेदसंदे
वंवहंतिकेतवः। दृशेविश्वायसूर्यं॥ नमोमित्रस्येत्यस्यसूर्यपुत्रोभितपाःसूर्योज
गती॰ आज्य॰ ॐ नमोमित्रस्यवरुणस्यचक्षसेमहोदेवायतदृतंसपर्यत। दूरेदृशेदे
वजातायकेतवेदिवस्पुत्रायसूर्यायशंसत। चित्रंदेवानामित्यस्यांगिरसःकुत्सःसू
र्यस्त्रिष्टुप्॰ ॐ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः। आप्राद्यावा
पृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्च॥ उदुत्तिस्रभगइतिपंचर्चस्यसूक्त
स्यमैत्रावरुणोवसिष्ठःसूर्यस्त्रिष्टुप्॰ ॐ उद्वेतिसुभगोविश्वचक्षाःसाधारणःसूर्यो

मानुषाणां। चक्षुर्मित्रस्यवरुणस्यदेवश्चर्मेवयःसमविव्यक्तमांसि। उद्वेतिप्रसवीताज
नानांमहान्केतुरर्णवःसूर्यस्य। समानंचक्रंपर्याविवृत्सन्यदेतशोवहतिधूर्षुयुक्तः। वि
भ्राजमानउषसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः। एषमेदेवःसविताचच्छंदयःस
मानंनप्रमिनातिधाम। दिवोरुक्मउरुचक्षाउदेतिदूरेअर्थस्तरणिर्भ्राजमानः।
नूनंजनाःसूर्येणप्रसूताअयन्नर्थानिकृणवन्नपांसि। यत्राचक्रुरमृतागातुमस्मै
श्येनोनदीयन्नन्वेतिपाथः। प्रतिवांसूरउदितेविधेमनमोभिर्मित्रावरुणोतह
व्यैः। त्वमग्नेप्रथमइतिअष्टादशर्चस्यसूक्तस्यांगिरसोहिरण्यस्तूपोग्निर्जगती त्रि
अंत्याष्टमीषोडश्यस्त्रिष्टुभः॰ ॐ त्वमग्नेप्रथमोअंगिराऋषिर्देवोदेवानामभवःशि
वःसखा। तवव्रतेकवयोविद्मनापसोजायंतमरुतोभ्राजदृष्टयः। त्वमग्नेप्रथमो

अंगिरस्तमः कविर्देवानांपरिभूषसिव्रतं। विभुर्विश्वस्मैभुवनायमेधिरोद्विमाताशयुःक
तिधाचिदायवे। त्वमग्नेप्रथमोमातरिश्वनआविर्भवसुक्रतूयाविवस्वते। अरेजेतांरोद
सीहोतृवूर्येसघ्नोर्भारमयजोमहोवसो। त्वमग्नेमनवेद्यामवाशयःपुरूरवसेसुकृते
सुकृत्तरः। श्वात्रेणयत्पित्रोर्मुच्यसेपर्यात्वापूर्वमनयन्नापरंपुनः। त्वमग्नेवृषभःपुष्टि
वर्धनउद्यतस्रुचेभवसिश्रवाय्यः। यआहुतिंपरिवेदावषट्कृतिमेकायुरग्रेवि
शआविवासति॥१॥ त्वमग्नेवृजिनवर्तनिंनरंसक्मन्पिपर्षिविदथेविचर्षणे।
यःशूरसातापरितक्म्येधनेदभ्रेभिश्चित्समृताहंसिभूयसः। त्वंतमग्नेअमृतत्व
उत्तमेमर्तंदधासिश्रवसेदिवेदिवे। यस्तातृषाणउभयायजन्मनेमयःकृणोषिप्र
यआचसूरये। त्वंनोअग्नेसनयेधनानांयशसंकारुंकृणुहिस्तवानः। ऋध्यामक

र्मापसानवेनदेवैर्द्यावापृथिवीप्रावतंनः। त्वंनोअग्नेपित्रोरुपस्थआदेवोदेवेष्वनवद्यजा
गृविः। तनूकृद्बोधिप्रमतिश्चकारवेत्वंकल्याणवसुविश्वमोपिषे। त्वमग्नेप्रमतिस्त्वं
पितासिनस्त्वंवयस्कृत्तवजामयोवयं। संत्वारायःशतिनःसंसहस्रिणःसुवीरंयंति
व्रतपामदाभ्य॥२॥ त्वामग्नेप्रथममायुमायवेदेवाअकृण्वन्नहुषस्यविश्पतिं। इ
ळामकृण्वन्मनुषस्यशासनींपितुर्यत्पुत्रोममकस्यजायते॥ त्वंनोअग्नेतवदेवपा
युभिर्मघोनोरक्षतन्वश्चवंद्य। त्रातातोकस्यतनयेगवामस्यनिमेषंरक्षमाणस्तवव्र
ते। त्वमग्नेयज्यवेपायुरंतरोनिषंगायचतुरक्षइध्यसे। योरातहव्योवृकायधायसे
कीरेश्चिन्मंत्रंमनसावनोषितं॥ त्वमग्नउरुशंसायवाघतेस्पार्हंयद्रेक्णःपरमंवनो
षितत्। आध्रस्यचित्प्रमतिरुच्यसेपिताप्रपाकंशास्सिप्रदिशोविदुष्टरः॥ त्वमग्ने

नवग्र· प्र·

२४

प्रयतदक्षिणंनरंवर्मेवस्यूतंपरिपासिविश्वतः। स्वादुक्षद्मायोवसतौस्योनकृज्जीवयाजं
यजतेसोपमादिवः॥ ३॥ इमामग्नेशरणिंमीमृषोनइमंअध्वानंयमगामदूरात्। आ
पिःपिताप्रमतिःसोम्यानांभृमिरस्यृषिकृन्मर्त्यानां। मनुष्वदग्नेअंगिरस्वदंगिरो
ययातिवत्सदनेपूर्ववच्छुचे। अच्छयाह्यावहादैव्यंजनमासादयबर्हिषियक्षिचप्रियं॥
एतेनाग्नेब्रह्मणावावृधस्वशक्तीवायत्तेचकृमाविदावा। उतप्रणेष्यभिवस्योअस्मा
न्संनःसृजसुमत्यावाजवत्या॥ ४॥ त्वमग्नेद्युभिरितिषोडशर्चस्यसूक्तस्यगृत्समदो
ग्निर्जगती। ॐ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि। त्वंवनेभ्य
स्त्वमोषधीभ्यस्त्वंनृणांनृपतेजायसेशुचिः॥ तवाग्नेहोत्रंतवपोत्रमृत्वियंतवनेष्ट्रं
त्वमग्निदृतायतः। तवप्रशास्त्रंत्वमध्वरीयसिब्रह्माचासिगृहपतिश्चनोदमे॥ त्वम २४

ग्नइंद्रोवृषभःसतामसित्वंविष्णुरुरुगायोनमस्यः। त्वंब्रह्मारयिविद्ब्रह्मणस्पतेत्वंविध
र्तःसचसेपुरंध्या॥ त्वमग्नेराजावरुणोधृतव्रतस्त्वंमित्रोभवसिदस्मईड्यः। त्वमर्य
मासत्पतिर्यस्यसंभुजंत्वमंशोविदथेदेवभाजयुः॥ त्वमग्नेत्वष्टाविधतेसुवीर्यंतव
ग्नावोमित्रमहःसजात्यं। त्वमाशुहेमारिरिषेस्वश्व्यंत्वंनरांशर्धोअसिपुरूवसुः॥ १॥
त्वमग्नेरुद्रोअसुरोमहोदिवस्त्वंशर्धोमारुतंपृक्षईशिषे। त्वंवातैरुरुणैर्यासिशंग
यस्त्वंपूषाविधतःपासिनुत्मना॥ त्वमग्नेद्रविणोदाअरंकृतेत्वंदेवःसवितारत्नधाअ
सि। त्वंभगोनृपतेवस्वईशिषेत्वंपायुर्दमेयस्तेविधत॥ त्वामग्नेदमआविश्पतिंविश
स्त्वांराजानंसुविदत्रमृंजते। त्वंविश्वानिस्वनीकपत्यसेत्वंसहस्राणिशतादशप्रति॥
त्वामग्नेपितरमिष्टिभिर्नरस्त्वांभ्रात्रायशम्यातनूरुचं। त्वंपुत्रोभवसियस्तेविधत्त्वंस

रवोस्फशेवः पास्या धृषः ॥ त्वमग्नऋभुराकेनमस्य१स्त्वंवाजस्यक्षुमतोरायईशिषे ।
त्वंविभास्यनुदक्षिदावनेत्वंविशिक्षुरसियज्ञमातनिः ॥५॥ त्वमग्नअदितिर्देवदा
शुषेत्वंहोत्राभारतीवर्धसेगिरा । त्वमिळाशतहिमासिदक्षसेत्वंवृत्रहावसुप
तेसरस्वती ॥ त्वमग्नसुभृतउत्तमंवयस्तवस्पार्हेवर्णआसंदृशिश्रियः । त्वंवाजः
प्रतरणोबृहन्नसित्वंरयिर्बहुलोविश्वतस्पृथुः । त्वामग्नआदित्यासआस्य१
त्वांजिह्वांशुचयश्चक्रिरेकवे । त्वांरातिषाचोअध्वरेषुसश्चिरेत्वेदेवाहविरदंत्याहु
तं । त्वे ~~[illegible]~~ अग्नेविश्वेअमृतासोअद्रुहआसादेवाहविरदंत्याहुतं ।
त्वयामर्त्तासःस्वदंतआसुतिंत्वंगर्भोवीरुधांजज्ञिषेशुचिः । त्वंतान्त्संचप्रतिचासि
मज्मनाग्नेसुजातप्रचदेवरिच्यसे । पृक्षोयदत्रमहिनाविवतेभुवदनुद्यावापृथिवी

रोदसीउभे । येस्तोतृभ्योगोअग्रामश्वपेशसमग्नेरातिमुपसृजंतिसूरयः । अस्मांश्चतां
श्चप्रहिनेषिवस्यआबृहद्वदेमविदथेसुवीराः ॥३॥ कद्रुद्रायेतिषळर्चस्यसूक्तस्य
घोरःकण्वोरुद्रोगायत्रीअंत्यातृतीयामित्रावरुणौ । ॐ कद्रुद्रायप्रचेतसेमीळ्हुष्टमा
यतव्यसे । वोचेमशंतमंहृदे ॥ यथानोअदितिःकरत्पश्वेनृभ्योयथागवे । यथातो
कायरुद्रियं ॥ यथानोमित्रोवरुणोयथारुद्रश्चिकेतति । यथाविश्वेसजोषसः ॥
गाथपतिंमेधपतिंरुद्रंजलाषभेषजं । तच्छंयोःसुम्नमीमहे ॥ यःशुक्रइवसूर्यो
हिरण्यमिवरोचते । श्रेष्ठोदेवानांवसुः ॥१॥ शंनःकरत्यर्वतेसुगंमेषायमेष्ये ।
नृभ्योनारिभ्योगवे ॥ अस्मेसोमश्रियमधिनिधेहिशतस्यनृणां । महिश्रवस्तु
विनृम्णं ॥ मानःसोमपरिबाधोमारातयोजुहुरंत । आनइंदोवाजेभज ॥ यास्ते

प्रजाअमृतस्यपरस्मिन्धामन्नृतस्य। मूर्द्धानाभासोमवेनआभूषंतीःसोमवेदः॥ २॥ ॥
इमारुद्रायेत्येकादशर्चस्यसूक्तस्यकुत्सोरुद्रोजगत्यंत्येत्रिष्टुभौ॰ ॐ इमारुद्रायत
वसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतीः। यथाशमसद्द्विपदेचतुष्पदेविश्वंपुष्टंग्रा
मेअस्मिन्ननातुरं॥ मृळानोरुद्रोतनोमयस्कृधिक्षयद्वीराय ~~[illegible]~~ नम
साविधेमते। यच्छंचयोश्चमनुरायेजेपितातदश्यामतवरुद्रप्रणीतिषु॥अश्या
मतेसुमतिंदेवयज्ययाक्षयद्वीरस्यतवरुद्रमीढ्वः। सुम्नायन्निद्विशोअस्माक
माचरारिष्टवीराजुहवामतेहविः॥त्वेषंवयंरुद्रंयज्ञसाधंवंकुंकविमवसेनिह्व
यामहे। आरेअस्मद्दैव्यंहेळोअस्यतुसुमतिमिद्वयमस्यावृणीमहे॥ दिवोवराह
मरुषंकपर्दिनंत्वेषंरूपंनमसानिह्वयामहे। हस्तेबिभ्रद्भेषजावार्याणिशर्म

वर्मच्छर्दिरस्मभ्यंयंसत्॥१॥ इदंपित्रेमरुतामुच्यतेवचःस्वादोःस्वादीयोरुद्रायवर्द्धनं।
रास्वाचनोअमृतमर्तभोजनंत्मनेतोकायतनयायमृळ॥ मानोमहान्तमुतमानोअर्भ
कंमानउक्षन्तमुतमानउक्षितं। मानोवधीःपितरंमोतमातरंमानःप्रियास्तन्वोरु
द्ररीरिषः॥ मानस्तोकेतनयेमानआयौमानोगोषुमानोअश्वेषुरीरिषः।वीरान्मानो
रुद्रभामितोवधीर्हविष्मंतःसदमित्त्वाहवामहे॥ उपतेस्तोमान्पशुपाइवाकरंरास्व
पितर्मरुतांसुम्नमस्मे। भद्राहितेसुमतिर्मृळयत्तमाथावयमवइत्तेवृणीमहे॥आ
रेतेगोघ्नमुतपूरुषघ्नंक्षयद्वीरसुम्नमस्मेतेअस्तु। मृळाचनोअधिचब्रूहिदेवाधा
चनःशर्मयच्छद्विबर्हाः॥ अवोचामनमोअस्माअवस्यवःशृणोतुनोहवंरुद्रोमरुत्वा
न्। तन्नोमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीउतद्यौः॥ २॥ ॥
आतेपितरितिपंचदशर्चस्यसूक्तस्यगृत्समदोरुद्रस्त्रिष्टुप्॰ गृहमखांगत्वेनआ॰

नमग॰ प्र॰

२७

ॐ आतेपितर्मरुतांसुम्नमेतुमानःसूर्यस्यसंदृशोयुयोथाः।अभिनोवीरोअर्वतिक्ष
मेतप्रजायेमहिरुद्रप्रजाभिः॥त्वादत्तेभीरुद्रशंतमेभिःशतंहिमाअशीयभेषजेभिः।
व्यस्मद्द्वेषोवितरंव्यंहोव्यमीवाश्चातयस्वाविषूचीः॥श्रेष्ठोजातस्यरुद्रश्रियासि
तवस्तमस्तवसांवज्रबाहो।पर्षिणःपारमंहसःस्वस्तिविश्वाअभीतीरपसोयु
योधि॥मात्वारुद्रचुक्रुधामानमोभिर्मादुष्टुतीवृषभमासहूती।उन्नोवीरांअ
र्पयभेषजेभिर्भिषक्तमंत्वाभिषजांशृणोमि॥हवीमभिर्हवतेयोहविर्भिरवस्तोमे
भीरुद्रंदिषीय।ऋदूदरःसुहवोमानोअस्यैबभ्रुःसुशिप्रोरीरधन्मनायै॥१॥उ
न्मामंदवृषभोमरुत्वान्त्वक्षीयसावयसानाधमानं।घृणीवच्छायामरपाअशीयावि
वासेयंरुद्रस्यसुम्नं।क्वस्यतेरुद्रमृळयाकुर्हस्तोयोअस्तिभेषजोजलाषः।अपभ २७

र्तारपसोदैव्यस्याभीनुमावृषभचक्षमीथाः।प्रबभ्रवेवृषभायश्वितीचेमहोमहीं
सुष्टुतिमीरयामि।नमस्याकल्मलीकिनंनमोभिर्गृणीमसित्वेषंरुद्रस्यनाम।स्थि न२
रेभिरंगैःपुरुरूपउग्रोबभ्रुःशुक्रेभिःपिपिशेहिरण्यैः।ईशानादस्यभुवन
स्यभूरेर्नवाउयोषद्रुद्रादसुर्यं।अर्हन्बिभर्षिसायकानिधन्वार्हन्निष्कंयजतं
विश्वरूपं।अर्हन्निदंदयसेविश्वमभ्वंनवाओजीयोरुद्रत्वदस्ति॥२॥स्तु
हिश्रुतंगर्तसदंयुवानंमृगंनभीममुपहत्नुमुग्रं।मृळाजरित्रेरुद्रस्तवानो
न्यंतेअस्मन्निवपंतुसेनाः।कुमारश्चित्पितरंवंदमानंप्रतिनानामरुद्रोपयं
तं।भूरेर्दातारंसत्पतिंगृणीषेस्तुतस्त्वंभेषजारास्यस्मे।यावोभेषजामरु
तःशुचीनियाशंतमावृषणोयामयोभु।यानिमनुरवृणीतापितानस्ताशंच

नवग्र· प्र·

२८

योस्वरुद्रस्यवश्मि।परिणोहेतीरुद्रस्यवृज्याःपरित्वेषस्यदुर्मतिर्महीगात्।
अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृळ।एवाबभ्रोवृषभ
चेकितानयथादेवनहृणीषेनहंसि।हवनश्रुन्नोरुद्रेहबोधिबृहद्वदेमवि
दथेसुवीराः॥३॥एतैरेकोनाशीतिमंत्रैःप्रतिमंत्रंस्वाहांतैराज्यंहुत्वाघंटादि
वादित्रशब्दैर्वेधामाराधितेकचत्वारिंशद्देवताभ्योवरुणायचधूपदीपनैवेद्यतां
बूलादीन्समर्प्यप्रसीदंतुभवंतइतितान्संप्रार्थ्यऋत्विगन्वारब्धःचरुतिल
व्रीहिशेषेणस्विष्टकृतंहुत्वाइध्मसन्नहनीमग्नौप्रास्यप्रायश्चित्तादिहोमं
शेषंसमाप्ययजमानान्वारब्धआचार्यःपूर्णाहुतिंस्थालीपाकवक्ष्यमाण २८

प्रकारेणपूर्णाहुतिंजुहुयात्·तद्यथा·स्रुवेणाज्यंगृहीत्वास्रुचंसमबिलांपूरयि
त्वातस्यांस्रुवमूर्ध्वबिलंनिधायपुनरधोबिलंनिक्षिप्यस्रुवाग्रेकुसुमाक्षतंनिधायस
व्यपाणिनास्रुक्स्रुवमूलेधृत्वादक्षिणपाणिनास्रुवंशंखमुद्रयागृहीत्वातिष्ठन्सम
पादऋजुकायःस्रुवाग्रन्यस्तदृष्टिःप्रसन्नात्मा·समुद्रादूर्मिरित्येकादशर्चस्यसूक्त
स्यवामदेवआपस्त्रिष्टुपूअंत्याजगती·पूर्णाहुतौविनियो·ॐसमुद्रादूर्मिर्मधुमाँउदार
दुपांशुनासममृतत्वमानट्।घृतस्यनामगुह्यंयदस्तिजिह्वादेवानाममृतस्यनाभिः।
वयंनामप्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः।उपब्रह्माशृणवच्छस्यमा
नंचतुःशृंगोवमीद्गौरएतत्।चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासो

नवग्र॰

२९

अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश। त्रिधा हितं पणिभिर्गुह्यमा
नं गवि देवासो घृतमन्वविंदन्। इंद्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः।
एता अर्षंति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे। घृतस्य धारा अभिचाकशी
मि हिरण्ययो वेतसो मध्य आसां॥१॥ सम्यक्स्रवंति सरितो न धेना अंतर्हृदा मनसा
पूयमानाः। एते अर्षंत्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः। सिंधोरिव प्राध्वने
शूघनासो वातप्रमियः पतयंति यह्वाः। घृतस्य धारा अरुषो न वाजी काष्ठा भिंदन्नूर्मि
भिः पिन्वमानः। अभि प्रवंत समनेव योषाः कल्याण्यः स्मयमानासो अग्निं। घृ
तस्य धाराः समिधो नसंत ता जुषाणो हर्यति जातवेदाः। कन्या इव वहतुमेतवा उ अ
ज्यंजाना अभिचाकशीमि। यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभितत्पवंते। २९

अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त। इमं यज्ञं नयत देवता नो घृतस्य
धारा मधुमत्पवंते। धामं ते विश्वं भुवनमधिश्रितमंतः समुद्रे हृद्यंतरायुषि। अपामनी
के समिथे य आभृतस्तमश्याम मधुमंतं त ऊर्मिं स्वाहेति पठन् यवपरिमित धारासंततं
स्रुगग्रेण सर्वं हुत्वा अग्नय इदं न ममेत्युद्दिश्य त्यक्त्वा॰ विज्योतिषेत्यस्य जातो वृषे
ग्निस्त्रिष्टुप्॰ अवशिष्टाज्यहोमे॰ ॐ वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते
महित्वा। प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृंगे रक्षसे विनिक्षे स्वाहेत्यनेन तथै
वावशिष्टं हुत्वा अग्नय इदं न ममेत्युक्त्वा॰ ॐ विश्वेभ्यो देवेभ्यः स्वाहेति संस्रावं हुत्वा
विश्वेभ्यो देवेभ्य इदं न॰। अथावसृतस्प्रानीय पूर्णपात्रजलेन मार्जनं कुर्यात्॰ तद्यथा॰
पूर्वं सादितपूर्णपात्रमास्तीर्णबर्हिषि दक्षिणपाणिना निधाय। तत्र गंगादिरिण्यन

दीः स्मरन्दक्षिणपाणिना स्पृशन् । पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः सद
सि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः अक्षितिरसि मा मे क्षेष्ठा इति जपित्वा कुशाग्रैः प्रागा
दिषु दिक्षु जलं मंत्रैर्यथालिंगं सिंचेत् । तत्र मंत्राः ॥ ॐ प्राच्यां दिशि देवा ऋत्विजो मा
र्जयंतां दक्षिणस्यां दिशि मासाः पितरो मार्जयंतां प्रतीच्यां दिशि गृहाः पशवो मार्जयंता
मुदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयंतामूर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापति
र्मार्जयंतामित्येकैकस्याः पठन्प्रतिदिशं सिक्त्वा कुशाग्रैः स्वशिरसि मार्जयेत् । तत्र मंत्राः
आपो अस्मानित्यस्य देवश्रवा आपस्त्रिष्टुप् मार्जने वि॰ ॐ आपो अस्मान्मातरः शुं
धयंतु घृतेन नो घृतप्वः पुनंतु । विश्वं हि रिप्रं प्रवहंति देवीरुदिदाभ्यः शुचिरा पूत एमि ।
इदमापः सिंधुद्वीप आपोनुष्टुप् मार्जने॰ ॐ इदमापः प्रवहत यत्किंच दुरितं मयि । यद्वाह

मभिदुद्रोह यद्वा शेप उतानृतं । सुमित्र्यान आप ओषधयः संतु॰ इत्येतैर्मंत्रैर्मार्जनं
कृत्वा॰ दुर्मित्र्यास्तस्मै संतु योस्मान्द्वेष्टि यं च वयं द्विष्मस्तं हन्मीति निर्ऋतिदेशे कुशाग्रै
र्णापः सिंचेत् । ततो ब्रह्मा यजमानवामपार्श्वस्थितपत्न्यंजलौ पूर्णपात्रस्य जलं॰ ॐ मा
हं प्रजां परासिचं या नः सयावरी स्थन । समुद्रे वो निनयानि स्वं पाथो अपीथेति मंत्रमेक
शुत्य पत्न्या वाचयन्स्वयं वा पठन् प्रत्यङ्मुखं निषिंच्यांजलिस्थजलैः पापापनोदार्थमा
त्मनि यजमानं पत्नीं च प्रोक्षेत्॰ पत्नी तज्जलं बर्हिषि निषिंचेत्॰ अथवा यजमान एव स्व
वामपाणावुत्ताने बर्हिर्निधाय तत्र दक्षिणपाणिना पूर्णपात्रमादाय॰ माहं प्रजामित्यनेन
तज्जलं प्रत्यङ्मुखं निषिच्य ता आपः समुद्रं गच्छंतीति ध्यात्वा पाणिस्थजलैरात्मानं प
त्नीं च प्रोक्षेत्॰ ततः कर्ताग्नेर्वायव्ये स्थितः संस्थाजपेनोपतिष्ठेत॰ अग्ने त्वं न इति

वतस्तरणां [illegible] गौपायनाऔपायनावाबंधुः स्रुबंधुः श्रुतबंधुर्विप्रबंधुश्चैकैकर्चाऋष
यः। अग्निर्देवता॰ द्विपदाविराट्छंदः। अग्न्युपस्थाने विनि॰ ॐ अग्नेत्वंनो अंतमउत
त्राता शिवोभवावरूथ्यः। वसुरग्निर्वसुश्रवा अच्छानक्षि द्युमत्तमं रयिंदाः। सनोबोधि
श्रुधी हवमुरुष्याणोअघायतः समस्मात्। तंत्वाशोचिष्ठदीदिवः सुम्नायनूनमीम
हेसखिभ्यः। ॐ यमेस्वरस्यमेयज्ञोपवतेनमस्य। यत्तेन्यूनं तस्मैतउपयन्नातिरिक्तं
तस्मैतेनमः अग्नयेनमः। स्वस्तिश्रद्धांमेधांयशः प्रज्ञां विद्यां बुद्धिंश्रियं बलं। आयु
ष्यंतेज आरोग्यं देहिमे हव्यवाहन देहिमे हव्यवाहनोन्नमः। ततो ब्रह्मापितत्रैवास्थि
त्वा एतेरेवोपतिष्ठेत। ततः कर्त्ता आचामेत्। मानस्तोकेकुत्सोरुद्रोजगती॰ विभूतिग्र
हणेवि॰ ॐ मानस्तोके तनये मान आयौ मानोगोषु मानो अश्वेषु रीरिषः। वीरा

न्मानोरुद्रभामितोवधीर्हविष्मंतः सदमित्वाहवामहे। इतिस्रुवबिलदेशेन विभूतिं
गृहीत्वा॰ ॐ त्र्यायुषं जमदग्नेरिति ललाटे कश्यपस्य त्र्यायुषमिति कंठे अगस्त्य
स्य त्र्यायुषमिति नाभ्यां यद्देवानां त्र्यायुषमिति दक्षिणस्कंधे तन्मेअस्तु त्र्यायु
षमिति शिरसि धारयेत्॰ ततः कर्त्ता परिस्तरणानि विसृज्याग्निं परिसमुह्य परि
षिच्य पुष्पादिभिरलंकृत्य नैवेद्यतांबूलं वा निवेद्य दक्षिणां दत्वा चरुस्थाल्यादि प्र
क्षाल्य पूर्वक्रमेण हं दूशा उत्सृजेत्॰ अथमंडपस्येशाने पंचरंगैः स्वस्तिकं कृत्वा च
तुष्पादं दीर्घचतुरस्रं सोत्तरच्छदं तत्रपीठं निधाय तत्रोदगग्रान्समूलान्हरितदर्भा
नास्तीर्य तत्रसामात्यं यजमानं प्राङ्मुखमुपवेश्याचार्यऋत्विग्भिः सहमंगलवा
द्यैरभिषेककुंभोदकं पात्रांतरे आदाय प्रत्यङ्मुखस्तिष्ठन्सपलाशयोदुंबर्यादिया

४३ असमाज इत्यस्य इष्टर्चस्यसूक्तस्यात्रिर्वरुणस्त्रिष्टुप्· ॐ असम्राजे बृहदर्चागभीरं ब्रह्मप्रियं वरुणाय श्रु
ताय। वियोजघानशमितेवचर्मोपस्तिरे पृथिवीं सूर्याय। वनेषु व्यंतरिक्षं ततान वाजमर्वत्सु पय उ
स्रियासु। हृत्सु क्रतुं वरुणो अप्स्वग्निं दिवि सूर्यमदधात्सोममद्रौ। नीचीनबारं वरुणः कवंधं प्र स

शाखया सहिरण्यपवित्रया सकुशदूर्वापल्लवया हस्तमंतर्धायोदकस्थघटाद्गृहीत्वा लिंगाभि
र्वारुणीभिः पावमानीभिरन्याभिश्च शांतिपवित्रलिंगाभिर्ग्रहाभिषेकमंत्रैः स्कंदास्त्वा
मितिसूक्तेनेमा आपः शिवतमा इतित्वेन देवस्यत्वेतिच यजुषा भूर्भुवस्वरितिच
व्याहृतिभिरभिषिंचेत्·। तत्र मंत्राः॥ आपो हिष्ठेति नवर्चस्य सूक्तस्यांबरीषः सिं
धुद्वीप आपो गायत्री· पंचमीवर्धमाना· सप्तमीप्रतिष्ठा· अंत्ये द्वे अनुष्टुभौ· अभि
षेके वि॰ ॐ आपो हिष्ठा मयोभुव इति ऋक्·९ स्वादिष्ठयेति दशर्चस्य सूक्तस्य मधुछ
दाः पवमानः सोमो गायत्री· ॐ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इंद्राय
पातवे सुतः। रक्षोहा विश्वचर्षणिरभि योनिमयोहतं। द्रुणा सधस्थमासदत्॥
सर्जरोदसी अंतरिक्षं। तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूम। उनत्ति भूमिं पृथि
वीमुत द्यां यदा दुग्धं वरुणो वष्ट्यादित्। समभ्रेण वसत पर्वतासस्तविषीयंतः श्रथयंत वीराः। इमा
मूष्वासुरस्य श्रुतस्य महीं मायां वरुणस्य प्रवोचं। मानेनेव तस्थिवां अंतरिक्षे वियोममे पृथिवीं सूर्येण॥५॥
इमामूनु कवितमस्य मायां महीं देवस्य नकिरादधर्ष। एकं यदुद्ना न पृणंत्येनीरासिंचंतीरवनयः समुद्रं।

परि यो धात नमोस्य वर्म हिष्ठोत्रहं तमः। परि षिराधो मघोनां। अभ्यर्ष महानां देवानां वीतिमंध
सा। अभि वाजमुत श्रवः। त्वामच्छा चरामसि तदिदर्थं दिवे दिवे। इंदो त्वे न आशसः॥१२॥ पु
नाति ते परिस्रुतं सोमं सूर्यस्य दुहिता। वारेण शश्वता तना। तमीमण्वीः समर्य आ गृभ्ण
ति योषणो दश। स्वसारः पार्ये दिवि। तमीं हिन्वंत्यग्रुवो धमंति बाकुरं दृतिं। त्रिधातु वार
णं मधु। अभीमं मम घ्न्या उत श्रीणंति धेनवः शिशुं। सोममिंद्राय पातवे॥२॥ शंन
इंद्राग्नी इति पंचदशर्चस्य सूक्तस्य वसिष्ठो विश्वेदेवास्त्रिष्टुप्· शंन इंद्राग्नी भवतामवो
भिः शंन इंद्रावरुणा रातहव्या। शमिंद्रासोमा सुविताय शंयोः शंन इंद्रापूषणा वाजसा
तौ। शंनो भगः शमु नः शंसो अस्तु शंनः पुरंधिः शमु संतु रायः। शंनः सत्यस्य सुयम
स्य शंसः शंनो अर्यमा पुरुजातो अस्तु। शंनो धाता शमु धर्ता नो अस्तु शंन उरूची भ

४५ अस्येदिंद्रो मदेष्वा विश्वा वृत्राणि जिघ्नते। २२ सोम घा वमंहते।

अर्यम्यं वरुण मित्र्यं वा सखायं वा सदमिद्भ्रातरं वा। वेशं वा
नित्यं वरुणारणं वा यत्सीमागश्चकृमा शिश्रथस्तत्।
कितवासो यद्रिरिपुर्न दीवि यद्वाघा सत्यमुत यन्न विद्म। स
र्वा ता विष्य शिथिरेव देवाधा ते स्याम वरुण प्रियासः॥२५

वतुस्वधाभिः। शंरोदसीबृहतीशंनोअद्रिः शंनोदेवानांसुहवानिसंतु। शंनोअग्निर्ज्योति
रनीकोअस्तुशंनोमित्रावरुणावश्विनाशं। शंनः सुकृतांसुकृतानिसंतुशंनइषि
रोअभिवातुवातः। शंनोद्यावापृथिवीपूर्वहूतौशमंतरिक्षंदृशयेनोअस्तु। शंनओ
षधीर्वनिनोभवंतुशंनोरजसस्पतिरस्तुजिष्णुः॥१॥ शंनइंद्रोवसुभिर्देवोअस्तु
शमादित्येभिर्वरुणः सुशंसः। शंनोरुद्रोरुद्रेभिर्जलाषः शंनस्त्वष्टाग्नाभिरिहशृ
णोतु। शंनः सोमोभवतुब्रह्मशंनः शंनोग्रावाणः शमुसंतुयज्ञाः। शंनः स्वरूणां
मितयोभवंतुशंनः प्रस्वः१शम्वस्तुवेदिः। शंनः सूर्यउरुचक्षाउदेतुशंनश्चतस्रः प्रदि
शोभवंतु। शंनः पर्वताध्रुवयोभवंतुशंनः सिंधवः शमुसंत्वापः। शंनोअदितिर्भवतुव्रते

भिः शंनोभवंतुमरुतः स्वर्काः। शंनोविष्णुः शमुपूषानोअस्तुशंनोभवित्रंशम्वस्तुवायुः। शं
नोदेवः सवितात्रायमाणः शंनोभवंतूषसोविभातीः। शंनः पर्जन्योभवतुप्रजाभ्यः शंनः
क्षेत्रस्यपतिरस्तुशंभुः॥२॥ शंनोदेवाविश्वदेवाभवंतुशंसरस्वतीसहधीभिरस्तु।
शमभिषाचः शमुरातिषाचः शंनोदिव्याः पार्थिवाः शंनोअप्याः। शंनः सत्यस्य
पतयोभवंतुशंनोअर्वंतः शमुसंतुगावः। शंनऋभवः सुकृतः सुहस्ताः शंनोभ
वंतुपितरोहवेषु। शंनोअजएकपाद्देवोअस्तुशंनोहिर्बुध्न्यः१शंसमुद्रः। शंनोअ
पांनपात्पेरुरस्तुशंनः पृश्निर्भवतुदेवगोपा। आदित्यारुद्रावसवोजुषंतेदंब्रह्म
क्रियमाणंनवीयः। शृण्वंतुनोदिव्याः पार्थिवासोगोजाताउतयेयज्ञियासः।
येदेवानांयज्ञियायज्ञियानांमनोर्यजत्राअमृताऋतज्ञाः। तेनोरासंतामुरु

गायमृधयूयंपातस्वस्तिभिःसदानः॥३॥ पवित्रंतेविततमितिपंचर्चस्यवर्गस्यांगिरसः
पवित्रःपवमानसोमोजगती॰ ॐपवित्रंतेविततंब्रह्मणस्पतेप्रभुर्गात्राणिपर्येषिवि
श्वतः।अतप्ततनूर्नतदामोअश्नुतेशृतासइद्वहंतस्तत्समाशत।तपोष्पवित्रंविततं ६
दिवस्पदेशोचंतोअस्यतंतवोव्यस्थिरन्।अवंत्यस्यपवीतारमाशवोदिवस्पृष्टमधि
तिष्ठंतिचेतसा।अरूरुचदुषसःपृश्निरग्रियउक्षाबिभर्तिभुवनानिवाजयुः।माया
विनोममिरेअस्यमाययानृचक्षसःपितरोगर्भमादधुः।गंधर्वइत्थापदमस्यरक्ष
तिपातिदेवानांजनिमान्यद्भुतः।गृभ्णातिरिपुंनिधयानिधापतिःसुकृत्तमा
मधुनोभक्षमाशत।हविर्हविष्मोमहिसद्मदैव्यंनभोवसानःपरियास्यध्वरं।राजा
पवित्ररथोवाजमारुहःसहस्रभृष्टिर्जयसिश्रवोबृहत्॥२॥ ॥अथग्रहमंत्राः॥ २६

ग्रहाणामादिरादित्योलोकरक्षणकारकः।विषमस्थानसंभूतांपीडांहरतुतेरविः॥१॥
रोहिणीशःसुधामूर्त्तिःसुधागात्रःसुधाशनः॥विषमस्थानसंभूतांपीडांहरतुतेविधुः॥
२॥भूमिपुत्रोमहातेजाजगतांभयकृत्सदा।वृष्टिकृद्वृष्टिहर्त्ताचपीडांहरतुतेकुजः॥३॥
उत्पातरूपोजगतांचंद्रपुत्रोमहाद्युतिः॥सूर्यप्रियकरोविद्वान्पीडांहरतुतेबुधः॥४॥
देवमंत्रीविशालाक्षःसदालोकहितेरतः।अनेकशिष्यसंयुक्तःपीडांहरतुतेगुरुः॥५॥
दैत्यमंत्रीगुरुस्तेषांप्राणदश्चमहामतिः।प्रभुस्ताराग्रहाणांचपीडांहरतुतेभृगुः॥६॥
सूर्यपुत्रोदीर्घदेहोविशालाक्षःशिवप्रियः।मंदचारःप्रसन्नात्मापीडांहरतुतेशनिः॥७॥
महाशिरामहावक्त्रोदीर्घदंष्ट्रोमहाबलः।अतनुश्चोर्ध्वकेशश्चपीडांहरतुतेतमः॥८॥
अनेकरूपवर्णैश्चशतशोथसहस्रशः।उत्पातरूपोजगतःपीडांहरतुतेशिखी॥९॥

देवमंत्राः॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः॥ वासुदेवो जगन्नाथस्तथा सं
कर्षणो विभुः॥१॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते। आखंडलोऽग्निर्भगवान्य
मो वै निर्ऋतिस्तथा॥२॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः॥ ब्रह्मणः सहिताः
सर्वे दिक्पालाः पांतु ते सदा॥३॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥
बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः कांतिश्च मातरः॥४॥ एतास्त्वामभिषिंचंतु राहुः
केतुश्च तर्पिताः। देवदानवगंधर्वा यक्षराक्षसपन्नगाः॥५॥ ऋषयो मुनयो गावो
देवमातर एव च। देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः। अस्त्राणि सर्वश
स्त्राणि राजानो वाहनानि च। औषधानि च रत्नानि कालस्यावयवाश्च ये॥७॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः। एते त्वामभिषिंचंतु सर्वकार्यार्थसि

द्धये॥८॥ एतैर्मंत्रैः प्रतिमंत्रमभिषिच्य श्रीसूक्तेन हिरण्यवर्णां हरिणीमित्यादिना इमा
आपः शिवतमा इति त्वेन देवस्य त्वेति च यजुषा भूर्भुवस्स्वरिति व्याहृतिभिः अभिषिंचेत्॰ श्या२
हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्य॰ कर्दमानंदश्चिक्लीतेंदिरासुता ऋषयः।
श्रीर्देवता॰ आद्यास्तिस्रोऽनुष्टुभः ततएका प्रस्तारपंक्तिः ततो द्वे त्रिष्टुभौ॰ ततोऽष्टा
वनुष्टुभोऽन्त्या प्रस्तारपंक्तिः अभिषेके॰ ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजां।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह। तां म आवह जातवेदो लक्ष्मीमनपगा
मिनीं। यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहं। अश्वपूर्वां रथमध्यां हस्तिनादप्र
बोधिनीं। श्रियं देवीमुपह्वये श्रीर्मा देवी जुषतां। कां सोस्मितां हिरण्यप्राकारामा
र्द्रां ज्वलंतीं तृप्तां तर्पयंतीं। पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियं। चंद्रां प्र

भासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदारां। तांपद्मिनीमींशरणंप्रपद्येऽलक्ष्मीर्मेन
श्यतांत्वांवृणे। आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः। तस्यफला
३८ नितपसानुदंतुमायांतरायाश्चबाह्याअलक्ष्मीः। उपैतुमांदेवसखःकीर्तिश्चम
णिनासह। प्रादुर्भूतोस्मिराष्ट्रेस्मिन्कीर्तिमृद्धिंददातुमे। क्षुत्पिपासामलांज्ये
ष्ठामलक्ष्मींनाशयाम्यहं। अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात्। गंधद्वारां
दुराधर्षांनित्यपुष्टांकरीषिणीं। ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं। मनसःका
ममाकूतिंवाचःसत्यमशीमहि। पशूनांरूपमन्नस्यमयिश्रीःश्रयतांयशः। कर्दमेन
प्रजाभूतामयिसंभवकर्दम। श्रियंवासयमेकुलेमातरंपद्ममालिनीं। आपःसृजं
तुस्निग्धानिचिक्लीतवसमेगृहे। निचदेवींमातरंश्रियंवासयमेकुले। आर्द्रांयष्करिणीं ३८

मा

यष्टिंसुवर्णांहेममालिनीं। सूर्यांहिरण्मयींलक्ष्मींजातवेदोमआवह। आर्द्रांपुष्करि
णींपुष्टिंपिंगलांपद्ममालिनीं। चंद्रांहिरण्मयींलक्ष्मींजातवेदोमआवह। तांमआ
वहजातवेदोलक्ष्मीमनपगामिनीं। यस्यांहिरण्यंप्रभूतंगावोदास्योश्वान्विंदेयं
पुरुषानहं॥ ऋक् १५॥ इमाआपःशिवतमाइमाःसर्वस्यभेषजीः। इमाराष्ट्रस्यव
र्धनीरिमाराष्ट्रभृतोमृताः। याभिरिंद्रमभ्यषिंचत्प्रजापतिःसोमंराजानंवरुणंय
मंमनुं। ताभिरद्भिरभिषिंचामित्वामहंराज्ञांत्वमधिराजोभवेह। महांतंत्वाम
हीनांसम्राजंचर्षणीनां। देवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत्। देवस्य
त्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांमग्नेस्तेजसासूर्यस्यवर्च
सेंद्रस्येंद्रियेणाभिषिंचामि। बलायश्रियेयशसेन्नाद्यायॐभूर्भुवःस्वः॥ इति
देवस्य० सरस्वत्यैभैषज्येन वीर्यायान्नाद्यायाभिषिंचामि· देव० अश्विनोर्भैषज्येन तेजसेब्रह्मव
र्चसायाभिषिंचामि· देव० इंद्रस्येंद्रियेण श्रियैयशसेबलायाभिषिंचामि·

श्वेतारक्तवस्त्रयुगं गंधमाल्याभरणानि बिभृयात् मंत्र:

मंत्रैरभिषिंचेत्॰ ततोभिषेकशालायामेवाभिषिक्तेयजमाने पूर्वादिदिक्षुविदिक्षु
च चित्रान्नेराचार्योदिग्देवताभ्याबलिमुत्क्षिपेत्॰ तत्रैवं॰ अग्न्यायतनस्यसमं
तादिक्षुविदिक्षुन्माषभक्तबलिंसुदीपंदिक्पालेभ्योदद्यात्॰ ॥ त्रातारमिंद्रं ग
र्गइंद्रस्त्रिष्टुप्॰ इंद्रप्रीत्यर्थेबलिदाने॰ ॐ त्रातारमिंद्रमवितारमिंद्रंहवेहवेसु
हवंशूरमिंद्रं। ह्वयामिशक्रंपुरुहूतमिंद्रंस्वस्तिनोमघवाधात्विंद्र:। इंद्राय
सांगायसपरिवारायसायुधायसशक्तिकायएषमाषभक्तबलिर्नम: ॥ भोइं
द्रदिशंरक्षबलिंभक्षममयजमानस्यसकुटुंबस्यायु:कर्त्ताशांतिकर्त्ताशुभ
कर्त्ताभवेतिपुष्पाक्षतजलानिपूर्वाभिमुखस्त्यजेत्॰ अग्निंदूतंकाण्वोमेधा
तिथिरग्निर्गायत्री। अग्निप्रीत्यर्थेबलि॰ ॐ अग्निंदूतंवृणीमहेहोतारं ३८

विश्ववेदसं। अस्ययज्ञस्यसुक्रतुं। अग्नयेसांगायेत्यादि॰ भोअग्नेइति॰ ततोदक्षिणे॰
यमायसोमंयमोयमोनुष्टुप्॰ यमप्री॰ ॐ यमायसोमंसुनुतयमायजुहुताहवि:। य
मंहयज्ञोगच्छत्यग्निदूतोअरंकृत:। यमायसांगायेत्यादि॰ ततोनैर्ऋत्यां॰ मोषुणो
घोर:कण्वोनिर्ऋतिर्गायत्री॰ निर्ऋतिप्री॰ ॐ मोषुण:परापरानिर्ऋतिर्दुर्हणावध
त्। पदीष्टतृष्णयासह। निर्ऋतइत्यादि॰ तत:पश्चिमे॰ तत्वायामिशुन:शेपोव
रुणस्त्रिष्टुप्॰ वरुणप्रीत्य॰ ॐ तत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानो
हविर्भि:। अहेळमानोवरुणेहबोध्युरुशंसमानआयु:प्रमोषी:। वरुणायेत्यादि॰
भोवरुण॰ ततोवायव्ये॰ तववायोऋतस्पतेवाग्वायुर्गायत्री॰ वायुप्री॰ ॐ तववायवृतस्पते
त्वष्टुर्जामातरद्भुत। अवांस्यावृणीमहे। वायवइत्यादि॰ तत:उत्तरे॰ सोमोधेनुंगोत

मः सोमस्त्रिष्टुप् · सोमप्री · ॐ सोमोधेनुंसोमोअर्वंतमाशुंसोमोवीरंकर्मण्यंददाति ।
सादन्यंविदथ्यंसभेयंपितृश्रवणंयोददाशदस्मै । सोमायसांगायेति · भोसोमदिशांर ·
इशान्यां · तमीशानगोतमईशानोजगती · ईशानप्रीत्य · ॐ तमीशानंजगतस्त
स्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं । पूषानोयथावेदसामसद्वृधेरक्षितापायु
रदब्धः स्वस्तये । ईशानायेत्यादि · भोईशानदिशांर · ततोईशानपूर्वयोर्मध्ये ·
आयंगौःसार्पराज्ञीअनंतोगायत्री · अनंतप्री · ॐ आयंगौःपृश्निरक्रमीदसदन्मा
तरंपुरः । पितरंचप्रयन्त्स्वः । अनंतायसांगायेत्यादि · भोअनंतदि · केचित्तु · तत्र
स्योनापृथिवीमेधातिथिर्भूमिर्गायत्री · भूमिप्री · ॐ स्योनापृथिविभवानृक्षरा ३८
निवेशनी । यच्छानःशर्मसप्रथः । भूम्यैसांगायेस · स्योनापृथिवीत्यनेनानंतबलि

माऊः । ततःपश्चिमनैर्ऋतमध्ये · ब्रह्मजज्ञानंगोतमोवामदेवोब्रह्मात्रिष्टुप् · ब्रह्मप्रीत्य
र्थेबलि · ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः । सबुध्न्याउपमा
अस्यविष्ठाःसतश्चयोनिमसतश्चविवः । ब्रह्मणेसांगायेत्यादि · भोब्रह्मणदिशां · ॥ त
तोग्रहवेद्याःसमंतात्ग्रहबलयोदेयाः । तत्रपूर्वे · आकृष्णेनहिरण्यस्तूपःसविता
त्रिष्टुप् · सूर्यप्रीत्य · ॐ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच । हिर
ण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् । आदित्यायसांगायसपरिवारा
यईश्वराग्निरूपाधिदेवताप्रत्यधिदेवतासहितायइमंसदीपंमाषभक्तबलिंस
मर्पयामीतिपुष्पांजलिंक्षिपेत् · भोआदित्यइमंबलिंगृहाणममयजमानस्या
युःकर्त्ताभवेत्यादि · एवमुत्तरत्रापिततोवेद्याग्नेये · । आप्यायस्वगोतमःसोमोगा

यत्री·सोमप्रीत्य॰ ॐ आप्यायस्वसमेतुते विश्वतः सोमवृष्ण्यं। भवावाजस्यसंगथे। सो
मायसांगाय॰ उमारूपाधिदेवताप्रत्यधिदेवतासहितायेत्यादि॰ अग्निर्मूर्धाविरूपों
गारकोगायत्री·अंगारक॰ प्री॰ ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं। अ
 पांरेतांसि जिन्वति। अंगारकायेत्यादि॰ स्कंदक्षेत्ररूपाधिदेवताप्रत्यधिदेवता
सहिता॰ ततः ईशान्यां·उद्बुध्यध्वं बुधः सौम्यो बुधो बुधस्त्रिष्टुप्·बुधप्री॰ ॐ उद्बुध्य
ध्वंसमनसः सखायः समग्निमिंधंबहवः सनीडाः। दधिक्रामग्निमुषसंचदेवीमिंद्रावतो
वसेनिह्वयेवः। बुधायसां॰ नारायणविष्णुरूपाधिदेवताप्रत्यधिदेवतासहितायेत्यादि॰
ततः उत्तरे। बृहस्पतेअतत्समदो बृहस्पतिस्त्रिष्टुप्·बृहस्पतिप्री॰ ॐ बृहस्पते अति
यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवसऋतप्रजाततदस्मासुद्रवि

णंधेहिचित्रं। बृहस्पतेसां॰ ब्रह्मेंद्ररूपाधिदेवताप्रत्यधिदेवतासहितायेत्यादि॰ ततः
पूर्वे·शुक्रः पाराशरः शुक्रो द्विपदाविराट्·शुक्रप्री॰ ॐ शुक्रः शुशुक्वाँ उषो न जारः प
प्रासमीचीदिवो न ज्योतिः। शुक्राय॰ इंद्रेंद्राणीरूपाधिदेवताप्रत्यधिदेवतासहिता॰
ततः पश्चिमे·शमग्निरिरिंबिठिः शनिरुष्णिक्·शनिप्रीत्य॰ ॐ शमग्निरग्निभिः क
रच्छंनस्तपतुसूर्यः। शंवातोवात्वरपा अपस्रिधः शनैश्चरायसां॰ यमप्रजापतिरूपाधि
देवताप्रत्यधिदेवतासहितायेत्यादि॰ ततो नैर्ऋत्यां·कयानो वामदेवो राहुर्गायत्री·राहुप्री॰
ॐ कयानश्चित्र आभुवदूती सदावृधः सखा। कयाशचिष्ठया वृता। राहवेसां॰ कालसर्परूपा
धिदेवताप्रत्यधिदेवतासहितायेत्यादि॰ ततो वायव्ये·केतुंकृण्वन्मधुच्छंदाः केतुर्गायत्री·
केतुप्रीत्यर्थं॰ ॐ केतुंकृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः। केतवेसां॰

दि॰

चित्रगुप्तब्रह्मरूपाधिदेवताप्रत्यधिदेवतासहि॰ ततोविघ्नान्तरतोगणपत्यांपञ्चकस्य॰
गणानांत्वा गृत्समदोगणपतिर्जगती॰ गणपति॰ ॐ गणानांत्वागणपतिंहवामहेक
विंकवीनामुपमश्रवस्तमं। ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिः
सीदसादनं। गणपतयेसांगायेत्यादि॰ ऋद्धिबुद्धिसहितायइमंमाषभक्तबलिं॰ जा
तवेदसेकश्यपोदुर्गात्रिष्टुप्॰ दुर्गाप्रीत्यर्थे॰ ॐ जातवेदसेसुनवामसोममरातीय
तोनिदहातिवेदः। सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः।
दुर्गायैसांगायैसपरिवारायैसायुधायैइमंबलिंसम॰ भोदुर्गेममयजमानस्य इमंबलिंगृहाण
आयुःकर्त्रीक्षेमकर्त्रीपुष्टिकर्त्रीतुष्टिकर्त्रीऋद्धिकर्त्रीभव॰। तववायोव्यश्वांगिर
सोवायुर्गायत्री॰ वायुप्री॰ ॐ तववायवृतस्पतेत्वष्टुर्जामातरद्भुत। अवांस्यावृणीमहे। ४०

सदीपंमाषभक्त

वायवेसांगायेत्यादि॰ आदित्प्रत्नआकाशोगायत्री॰ आकाश॰ ॐ आदित्प्रत्नस्यरेतसो
ज्योतिष्पश्यंतिवासरं। परोयदिध्यतेदिवा। आकाशेत्यादि॰ एषोउषाप्रस्कण्वोऽश्वि
नौगायत्री॰ अश्विनोप्री॰ एषोउषाअपूर्व्याव्युच्छतिप्रियादिवः। स्तुषेवामश्विना
बृहत्। अश्विभ्यांसांगाभ्यांसपरिवाराभ्यांसायुधाभ्यांसशक्तिकाभ्यांएषमाष
भक्तबलिर्नमम। भोअश्विनौइमंबलिंगृहीतंआयुःकर्त्तारौस्तं॰ वास्तोष्पतेव
सिष्ठोवास्तोष्पतिस्त्रिष्टुप्॰ वास्तोष्पति॰ ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वा
वेशोअनमीवोभवानः। यत्वेमहेप्रतितन्नोजुषस्वशंनोभवद्विपदेशंचतुष्पदे। शं
वास्तोष्पतयेत्यादि॰ ततोमहाबलिंकुंकुमादिरक्तंरक्तपुष्पादियुतंसदीपंसदक्षि
णंक्षेत्रपालायदद्यात्॰। क्षेत्रस्यवामदेवःक्षेत्रपालोऽनुष्टुप्॰ क्षेत्रपालप्रीत्यर्थे॰

सयजमानआचार्यः ५

ग्रहम॰प्र॰ ॐ क्षेत्रस्य पतिना वयं हितेनेव जयामसि। गामश्वं पोषयित्न्वा स नो मृळातीदृशे। क्षेत्र
पालाय भूतप्रेतपिशाचराक्षसशाकिनीडाकिनीवेतालादिपरिवारयुताय इमं माष
भक्तबलिं समर्पयामि। भो भो क्षेत्रपाल इमं बलिं गृहाण मम यजमानस्य वा
४१ आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता तुष्टिदो भव। इमं बलिं शूद्रेण ब्रा
ह्मणेन वा चतुष्पथे क्षेपयेत्. ततः प्रक्षालितपाद आचम्य स्ववासिनीभि
र्नीराजनं कारयेत्. ततो यजमानोऽभिषेकवस्त्रमाचार्याय दत्वा श्वेतांबरं धृत्वा
श्वेतचंदनश्वेतपुष्पाणि च धृत्वाभिषेकशालातोऽग्निसमीपमागत्याग्निग्रह
पीठदेवतानां च पंचोपचारपूजनं तेऽग्निं ग्रहांस्तदुपदेवतांश्च ध्यात्वा. अग्न
ये नमः। आदित्याय नमः इति मंत्रैः प्रणवादिभिः प्रत्येकं पुष्पांजलिं समर्पयेत्. ४१

ततः आचार्यो देवतोद्वासनं कुर्यात्. ॐ भूर्भुवः स्वः आदित्याय नमः आदित्यमुद्वास
यामि। एवं सोमादीनामुद्वासनवाक्यमूह्यं। ततो ब्राह्मणेभ्यो जपहोमफलं गृही
त्वा आचार्यादिभ्यो दक्षिणां दद्यात्.। तदनंतरं वरणक्रमेण ऋत्विजः प्रतिनिधय
श्च उदङ्मुखाः प्राङ्मुखयजमानहस्ते श्रेयः संपादनं कुर्वंति। तच्चैवं. शिवा आ
पः संत्विति यजमानहस्ते जलं क्षिपेत्। सौमनस्यमस्त्विति पुष्पं। अक्षतं चारि
ष्टं चास्त्विति अक्षतान्। दीर्घमायुः शांतिः पुष्टिस्तुष्टिश्चास्त्विति पुनर्जलं।
मया त्वदन्वियोगेन ग्रहमखआचार्यादिकर्मकृतं यदुत्पन्नं श्रेयः तत्तुभ्यमहं
संप्रददे। तदनंतरं अग्नेः पश्चिमभागे प्राङ्मुखोपविष्टो यजमानः उदङ्मुखा
नाचार्यादीन्पूजयित्वा वरणक्रमेण दक्षिणां दद्यात्। तद्यथा अद्येत्यादिकृत

स्यग्रहमखकर्मणः सांगता सिद्ध्यै आचार्यादीन्पूजयिष्ये इति संकल्प्य आदित्यादि
ग्रहस्वरूपिणे आचार्याय इदं पाद्यमिदं बार्हस्पत्यं वासोयुगलमित्यादि गंधपुष्पधू
पदीपतांबूलादि दत्वा पूर्वोक्तविशेषण॰ कृतस्य ग्रहमखादिकर्मणः प्रतिष्ठासिध्य
र्थममुकगोत्रायामुकशर्मणे आचार्याय यथाशक्त्यलंकृतां इमां सवत्सां गां रुद्रदेव
त्यां इदं च हिरण्यं अग्निदैवतं तुभ्यमहं संप्रददे इति कुशाक्षतसहितजलं विप्रह
स्ते निःक्षिप्य न मम इति वदेत्॰ विप्रस्तु स्वस्तीत्युक्त्वा॰ कामस्तुतिं॰ क इदं कस्मा अदा
दित्यादिकां शाखास्थां पठेत्॰ अनंतरं ऋत्विजोपि पूजयित्वा संकल्प्यपूर्वकं दक्षिणां द
द्यात्॰ सूर्यप्रीत्यर्थमाचार्याय गां॰ अथर्त्विग्भ्यः सोमप्रीत्यर्थं शंखं॰ अंगारकप्रीत्यर्थं रक्तम
नड्वाहं॰ बुधप्रीत्यर्थं सुवर्णं॰ बृहस्पतिप्रीत्यर्थं पीतं वासः शुक्रप्रीत्यर्थं श्वेतमश्वं॰ श ४२

नि प्रीत्यर्थं कृष्णां गां॰ राहुप्रीत्यर्थं कालायसं॰ केतुप्रीत्यर्थं हस्तिनं छागं वेति॰ तत्तद्धोमक
र्तृव्यवस्थया तां दक्षिणां दद्यात्॰ तत्र मंत्राः॰ कपिले सर्वदेवानां पूजनीयासि सर्वदा।
सर्वदेवमयी यस्मादतः शांतिं प्रयच्छ मे।१ त्वं पुरा सागरोत्पन्ना विष्णुना विधृतः करे॰ पां
चजन्यं प्रदास्यामि ह्यतः शांतिं प्रयच्छ मे॰ २ धर्मस्त्वं वृषरूपेण जगदानंदकारकः अष्ट
मूर्तेरधिष्ठानमतः शांतिं॰ ३ हिरण्यगर्भगर्भस्थं॰ ४ पीतवस्त्रयुगं यस्माद्वासुदे
वस्य तु वल्लभं॰ प्रदानात्तस्य तो विष्णुरतः शांतिं प्रयच्छतु॰ ५ विष्णुस्त्वमश्वरूपेण यस्मा
दमृतसंभवः। चंद्रार्कवाहनो नित्यमतः शांतिं प्र॰ ६ यस्मात्त्वं पृथिवी सर्वा धेनो केशवसन्निभा
सन्निभे॰ सर्वपापहरा नित्यमतः शांतिं॰ ७ यस्मादायसकर्माणि त्वदधीनानि सर्वदा।
लांगलाद्यायुधादीनि तस्माच्छांतिं॰ ८ यस्मात्त्वं छागयज्ञानां अंगत्वेन व्यवस्थितः

यानंविभावसोनित्यमतःशांतिंप्रयच्छमे· ९ यस्मादायसकार्याणित्वदधीनानिसर्वं
इति· एषामर्थानांविषममूल्यकत्वेपिन्यूनलाभवद्भ्यःसुवर्णदानेनलाभसाम्यंसं
पादनीयं।७ उक्तदक्षिणानामभावेसर्वेष्यस्तच्छिकरंहिरण्यमेववादद्यात्· अतोनात्र
मूलाध्यायोक्तमूल्यदानं· सर्वस्मिन्पक्षेआचार्यायद्विगुणंदद्यात्· ततःकांस्यपा
त्रगतमाज्यमवेक्ष्य· रूपंरूपंप्रतिरूपोबभूवतदस्यरूपंप्रतिचक्षणाय· इंद्रोमाया
भिःप्रतिरूपईयतेयुक्ताह्यस्यहरयःशतादश।आज्यंसुराणामाहारआज्येदेवाः
प्रतिष्ठिताः इतिमंत्रंजपित्वातदाज्यंसदक्षिणंब्राह्मणायदद्यात्· ततोना●ना
नामगोत्रेभ्योंशर्मभ्योब्राह्मणेभ्योदीनानाथेभ्यश्चयथाशक्तिभूयसींदक्षिणां ४३
नाना
आज्यंतेजःसमुद्दिष्टमाज्यंपापहरंपरं

दातुमुत्सृजेनममेतिसकुशाक्षतजलंक्षिप्त्वा· ॐतत्सदितिवदेत्· प्रधानाहुतयस्ता
वतोब्राह्मणान्भोजयेत्· यावंतिदत्ताहुतिशतानितावतोवा· यावंतितत्सहस्रा
णितावतोवा· ततोग्निंसंपूज्यगच्छगच्छसुरश्रेष्ठेतिअग्निंविसृज्यग्रहदेवताश्च
यांतुदेवगणाइतिविसृज्यआचार्यायदद्यात्· ततःकृतस्यग्रहमखादिकर्मणः
संपूर्णतासिद्ध्यर्थंयथोपपन्नेनयथाकालेननानागोत्रान्नानाशर्मणोमुकसंख्या
न्ब्राह्मणान्भोजयिष्ये इतिसंकल्प्ययथाकालंब्राह्मणान्भोजयेत्· भुक्तवद्भ्यो
यथाशक्तिदक्षिणांदत्वाप्रार्थयेत्· संकल्पानंतरंब्राह्मणभोजनसंकल्पःब्रह्मा
र्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतं· ब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधिना·

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च· हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु· म
यायत्कृतं यथाकालं यथादेशं यथाज्ञानं यथाशक्ति नवग्रहमखादिकर्म तेन श्रीपर
मेश्वरः प्रीयतां ॐ तत्सद्ब्रह्मार्पणमस्तु· इति कुशजलं क्षिपेत्· ततः ब्राह्मणान्
चंदनाक्षतपुष्पवस्त्रतांबूलदक्षिणाभिः पूजयित्वा अंजलिं बध्वा मया यत्कृतं
ग्रहमखादिकर्म तत्कालहीनं भक्तिहीनं शक्तिहीनं श्रद्धाहीनं भवतां ब्राह्मणानां
वचनात्सर्वं संपूर्णमछिद्रं चास्तु । इति प्रार्थयेत्· ततः संपूर्णमस्त्वछिद्रमस्त्विति सर्वे वदे
युः । इत्याद्याशिषो गृहीत्वा तान्संप्रार्थ्य· प्रणिपत्य· यस्य स्मृत्या च नामोक्त्या तपोय
ज्ञक्रियादिषु· न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं· प्रमादात्कुर्वतां कर्म प्रच्य
वेताध्वरेषु यत्· स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः इत्युक्त्वा· न्यूनाति रि ४४

क्तिद्वार्थमच्युतानंतगोविंदेति नामत्रयं जपेदिति पारिजाते· ग्रहयज्ञफलं श्रीविष्ण
वे समर्थ स्वयं हृष्टमनाः बंधुभिः सह भुंजीत । अयं चाश्वलायनगृह्यपरिशिष्टोक्तो
ग्रहमखः । स्मार्ताग्निमतामाश्वलायनानामेव । बह्वृच्यं वा स्वगृह्योक्तं यस्य कर्म
प्रचोदितं । तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेत्· इति वचनात्· एवमन्येषा
मपि यदा स्वगृह्यादावुक्तस्तदा स एव· येषां त्वस्वगृह्यादौ नोक्तस्तैर्याज्ञवल्क्यादिस्मृ
त्युक्तो मत्स्यपुराणोक्तो वानुष्ठेयः । स्मृत्यादेः साधारण्यादिति दिक्· ॥ ॥ ॥
इति श्रीनारायणभट्टकृते प्रयोगरत्ने नवग्रहमखप्रयोगः समाप्तः ॥ श्रीः ॥ ७ ॥
शके १७२८ रक्ताक्षी भाद्रपदशुक्लपंचम्यां जडियाख्यरामचंद्रेण लिखितमिदम्
श्रीसप्तकोटीश्वरार्पणमस्तु· ॥ ॥ ॥ ॥

84